ISSN No. .457 - 0729

विक्रमाब्दः - २०७३-२०७४

ISSN No.

खीस्ताब्दः - २०१६-१७

सन्दर्भिता मूल्याङ्किता च वार्षिकी शोधपत्त्रिका

# वाग्वै ब्रह्म

## व्याकरणशास्त्रविभागीया वार्षिकशोधपत्त्रिका

सृष्टौ या सर्गरूपा जगदवनविधौ पालिनी या च रौद्री,
संहारे चापि यस्या जगदिदमखिलं क्रीडनं या पराख्या ।
पश्यन्ती मध्यमाऽथो तदनु भगवती वैखरीवर्णरूपा-
साऽस्मद्वाचं प्रसन्ना विधिहरिगिरिशाराधिताऽलङ्करोतु ॥

व्याकरणविभागः

राष्ट्रियसंस्कृतसंस्थानम्

( मानितविश्वविद्यालयः )

( मानवसंसाधनविकासमन्त्रालयभारतसर्वकाराधीनम् )

NAAC द्वारा 'A' श्रेण्यां प्रत्यायितम्

क. जे. सोमैयासंस्कृतविद्यापीठम्,

विद्याविहारः, मुम्बई-७७

Scanned with CamScanner

# शोधपत्रविषयक्रमः पृष्ठाङ्कनिर्देशश्च


| क्र. सं. | विषयः | लेखकः | पृष्ठाङ्कः |
|---|---|---|---|
| 1. | शब्दानुशासनविमर्शः | प्रो. प्रकाशचन्द्रः | 01 |
| 2. | पस्पशाह्निकग्रन्थिविमोकः | प्रो. बोधकुमारझाः | 10 |
| 3. | माहेश्वरसूत्रेषु द्विधा णकारानुबन्धविमर्शः | डॉ. अशोकचन्द्रगौडशास्त्री | 21 |
| 4. | भाष्यानुसारिशब्दार्थसम्बन्धविमर्शः | डॉ. शरदचन्द्रसाहुः | 24 |
| 5. | सैषा संस्कृते भाषितभङ्गी | डॉ. दीपेशकतिरा | 28 |
| 6. | शब्दस्य ज्ञाने धर्मः आहोस्वित् प्रयोगे | डॉ. माधवदत्तपाण्डेयः | 34 |
| 7. | णकारानुबन्धत्वविचारः | डॉ. नवीनकुमारमिश्रः | 39 |
| 8. | महाभाष्यपस्पशाह्निकस्य भाषावैज्ञानिकमध्ययनम् | श्रीसुरेशचेमटे | 45 |
| 9. | पस्पशाह्निके प्रयुक्तविशिष्टशब्दानां परिशीलनम् | श्रीमती ऋतम्भरा पाण्डेयः | 52 |
| 10. | लृकारोपदेशविमर्शः | श्रीसत्यराजरेग्मी | 58 |
| 11. | पस्पशाह्निकोक्तमन्त्रार्थविमर्शः | सुश्रीः विदुषी बोल्ला | 62 |
| 12. | सिद्धे शब्दार्थसम्बन्धे | श्री ईशान्तः | 76 |
| 13. | अथ शब्दानुशासनम् | सुश्रीराधाशर्म्मा | 82 |
| 14. | व्याकरणाध्ययनस्य मुख्यगौणप्रयोजनानि | श्रीआशिषडोगरा | 85 |
| 15. | रक्षोहागमलघ्वसन्देहा' इत्यस्य विमर्शः | श्रीचन्द्रमापौड्यालः | 92 |
| 16. | पस्पशाह्निकस्य भाषावैज्ञानिकमध्ययनम् | सुश्रीः मुग्धा चन्द्रकान्त दाते | 95 |
| • | संगोष्ठीप्रतिवेदनम् | | 102 |


❖❖❖

Scanned with CamScanner

# पस्पशाह्निकोक्तमन्त्रार्थविमर्शः

✍विदुषी बोल्ला

**महता श्रमेण सम्बद्धं वाङ्मयं निर्मथ्य व्याख्यानविशेषेण सनाथीकृत्य नानासन्दर्भानुपस्यन्ती मन्त्रोक्तपदानि नैकया विधया विमृशन्ती वाक्यार्थं च निरूपयन्ती गवेषिकात्र ''रक्षार्थं वेदानामध्येयं व्याकरणमि''ति प्रमाणयित्रीव भाति । ( स० )**

'वेदोऽखिलो धर्ममूलम्'[1] इति निखिलधर्ममूलतया वेदः अवगम्यते, अस्याम्नायस्य शिक्षाव्याकरणच्छन्दोनिरुक्तज्यौतिषकल्पाख्यानि षडङ्गानि विश्वप्रसिद्धानि विराजन्ते । तत्र च 'प्रधानञ्च षट्स्वङ्गेषु व्याकरणम्' इत्यभियुक्तोक्त्या पाणिनेः अष्टाध्यायी, वररुचेः वार्त्तिकानि, शेषावतारतया प्रख्यातस्य भगवत्पतञ्जलेः महाभाष्यञ्च देदीप्यन्ते । महाभाष्याब्धौ चतुरशीतिराह्निकानि विद्यन्ते । तत्र प्रथमाह्निकमुपोद्घातत्वेन 'पस्पशा'[2] इति नाम्ना संश्रूयते । आह्निकेऽस्मिन्नादौ भगवता व्याकरणं पिपठिषद्भ्यः प्रयोजनम्, प्रयोजनप्रयोजनानि, प्रयोजकवचनानि चोक्तानि । तत्र प्रयोजनन्तु व्याकरणस्य 'शब्दानुशासनमि'[3] ति, प्रयोजनप्रयोजनानि 'रक्षोहाऽऽगमलघ्वसन्देहाः'[4] इति, प्रयोजकवचनानि च त्रयोदश विद्यन्ते - तेऽसुराः, दुष्टः शब्दः, यदधीतम्, यस्तु प्रयुङ्क्ते, अविद्वांसः, विभक्तिं कुर्वन्ति, यो वा इमाम्, चत्वारि, उतत्वः, सक्तुमिव, सारस्वतीम्, दशम्यां पुत्रस्य, सुदेवो असि वरुण इति ।[5] प्रयोजकवचनेषु भगवता केचन मन्त्रा[6] उद्धृताः, ते च –

1. चत्वारि श्रृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ।
   त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यॉं3 आविवेश ॥
2. चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ।
   गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ॥
3. उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम् ।
   उतो त्वस्मै तन्वं विसस्रे जायेव पत्य उशती सुवासाः ॥
4. सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत ।
   अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधिवाचि ॥
5. सुदेवो असि वरुण यस्य ते सप्त सिन्धवः ।
   अनुक्षरन्ति काकुदं सूर्म्यं सुषिरामिव ॥

एतेषां मन्त्रणामर्थो विमृश्यते -

**प्रसङ्गः** - श्रीमद्भगवता पतञ्जलिना व्याकरणस्य प्रयोजकवचनेषु चत्वारि इति अष्टमं प्रयोजकमुक्तम् ।

Scanned with CamScanner

चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ।
त्रिधा बद्धः वृषभो रोरवीति महो दवो मर्त्यॉं३ आविवेश ॥

मन्त्रसन्दर्भः -

- ऋग्वेदे - मण्डलम् - 4, सूक्तम् - 58, मन्त्रसंख्या - 3, ऋषिः- वामदेवगौतमौ, देवता - अग्निः सूर्यो वाऽपो वा गावो वा घृतं वा ।
- यजुर्वेदे - अध्यायः - 17, मन्त्रसंख्या - 19, ऋषिः - वामदेवः, देवता - यज्ञपुरुषः ।

अन्वयः - अस्य चत्वारि शृङ्गा त्रयो पादा द्वे शीर्षे अस्य सप्त हस्तासः
त्रिधा बद्धो वृषभो महो देवो मर्त्यान् आविवेश (इति) रोरवीति ।

पदार्थः - चत्वारि - चतुःसंख्यकानि ।

शृङ्गा - शृङ्गाणि ='पश्वादीनां विषाणे' इति वाचस्पत्यम् । अत्र तु नामख्यातोपसर्गनिपाताश्च शृङ्गाणि इति ।

त्रयः - त्रिसंख्यकाः ।

अस्य - वृषभस्य ।

पादाः - चरणाः = कालरूपाः भूतभविष्यद्वर्त्तमानाः ।

द्वे - द्विसंख्यकाः ।

शीर्षे - मस्तके 'उत्तमाङ्गं शिरः शीर्षं मूर्धा ना मस्तकोऽस्त्रियाम्' इत्यमरः ।[7]

द्वौ शब्दात्मानौ नित्यः कार्यश्च ।

सप्त - सप्तसंख्यकाः ।

हस्तासः - पाणयः देहावयवभेदे इत्यमरः । अत्र विभक्तयः गृह्यन्ते ।

अस्य - वृषभस्य ।

त्रिधा - त्रिभिः प्रकारैः ।

बद्धः - प्रतिबद्धः, बन्धनयुक्तः ।

वृषभः - पुरुषगवः - 'ऋषभः वृषभः गौः' इत्यमरः ।

रोरवीति - पौनःपुन्येन शब्दं करोति ।

महः - मह्यते पूज्यते इति महः=पूज्यः ।

देवः - देवता = दीव्यते[8] क्रीड्यते यस्मात् रोचते द्योतते दिवि ।

तस्माद्देव इति प्रोक्तः स्तूयते सर्वदैवतैः ॥ इति वाचस्पत्ये ।

मर्त्यान् - मनुष्यान् विदुषः । मर्त्या मरणधर्माणो मनुष्याः इति महाभाष्ये मूल एवोक्तम् ।

आविवेश - समनुप्रविष्टः, स्वभेदमाविश्चकार इति ।

Scanned with CamScanner

**वाक्यार्थः -**

वृषभाकारस्य शब्दस्य चत्वारि नामाख्यातोपसर्गनिपातरूपाणि शृङ्गाणि, त्रयः कालरूपाः भूतभविष्यद्वर्त्तमानाः पादाः, द्वे शब्दात्मानौ नित्यकार्यरूपौ शीर्षे, सप्त विभक्तिरूपाः हस्ताः सन्ति । एष वृषभः त्रिषु स्थानेषु उरसि कण्ठे शिरसि च बद्धः महान् देवः शब्दब्रह्म मनुष्यान् प्रविष्टवान् इति शब्दं करोति । अर्थात् वृषभाकारः शब्दशास्त्रप्रतिपाद्यः शब्दो रोरवीति महान् देवोन्तर्यामिरूपः शब्दः मर्त्यानाविवेश स्वाभेदमाविष्कृतवानिति मन्त्रतात्पर्यम्।

**व्याख्यानविशेषः -**

यद्यपि अयं मन्त्रो निरुक्ते वेदस्तुतिपरत्वेनान्यत्र अग्निस्तुतिपरत्वेन च व्याख्यातः, तथापि परमर्षिभिः ध्यानविशेषबलात् अनुसंहितम् अग्नितत्वं वेदतत्वं स्फोटतत्वञ्च कारणरूपेणैकमिति कृत्वा एष मन्त्रः स्फोटरूपशब्दस्तुतावपि विनियुज्यते । मन्त्रघटकशृङ्गा इत्यस्य शृङ्गानि इत्यवगन्तव्यम् । वेदे शृङ्गानि इत्यत्र 'शेश्छन्दसि बहुलम्'[9] इत्यनेन शिलोपे नलोपे च कृते शृङ्गा इति सिद्ध्यति । अथवा 'सुपां सुलुक्पूर्व-सवर्णाच्छेयाडाड्यायाजालः'[10] इत्यनेन शेर्डादेशे निष्पद्यते । नामाख्यातोपसर्गनिपातरूपाणि शृङ्गाणि इत्यत्र नामशब्देन सुबन्तः गृह्यते, 'नमत्याख्यातार्थं प्रति विशेषणी भवतीति' व्युत्पत्तेः। आख्यातमित्यनेन तिङन्तं बोध्यम्, 'आख्यातमाख्यातेन क्रियासातत्ये' इति गणसूत्रमत्र प्रमाणम् । उपसर्गनिपातयोः पृथगुपादानं ब्राह्मणवशिष्टन्यायेनोद्रम् । एवञ्चोपसर्गपदेन धात्वर्थ-द्योतकतामात्रवतामुपसर्गाणां तथा निपातेन धात्वर्थद्योतकत्ववाचकत्वोभयवतामुपसर्गातिरिक्त-निपातानां ग्रहणम् । तथा च शब्दात्मानौ नित्यः कार्यश्च व्यङ्ग्यव्यञ्जकभेदेन भवतः । व्यङ्ग्यः आन्तरः स्फोटात्मकः, व्यञ्जकः वैखरीरूपः ध्वन्यात्मकश्चानित्यो भवति । भर्तृहरिणाप्युक्तम् - **द्वावुपादानशब्देषु शब्दौ शब्दविदो विदुः ।**
**एको निमित्तं शब्दानामपरोऽर्थे प्रयुज्यते ॥**[11]

मन्त्रघटकहस्तास इत्यस्य हस्ताः इत्यर्थः, छान्दसत्वात् 'आज्जसेरसुक्'[12] इत्यनेन असुकि देवासः इतिवद्रूपाणि प्रवर्त्तन्ते । सप्तविभक्तयः इति । अत्र विभक्तिशब्देन तत्प्रयोजकं कारकषट्कं षष्ठ्यर्थसम्बन्धश्च इति सप्तकं गृह्यते । तदेव प्रदीपेऽपि - तिङामपरिग्रहप्रसङ्गात् शेषेण सह सप्तकारकाणि विभक्तिशब्दाभिधेयानि इति व्याचक्षते।[13] छायाटीकानुसारं सप्तविभक्तय इत्यनेन सुपः तिङश्च गृह्यन्ते । भाष्ये उरसि कण्ठे शिरसि च त्रिधा बद्धः । अत्र च 'मारुतस्तूरसि चरन्मन्द्रं जनयति स्वरम्', 'सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः । वर्णान् जनयते तेषां विभागः पञ्चधा स्मृतः ॥' इत्यादि शिक्षावाक्यं लिङ्गम् । शिक्षाकारैः वर्णानाम् अष्ट उच्चारणस्थानानि सङ्गृहीतानि -

**'अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा ।**
**जिह्वामूलञ्च दन्ताश्च नासिकोष्ठौ च तालु च ॥'**[14] **इति ।**

Scanned with CamScanner

एतान्नेवात्र त्रिधा विभज्यन्ते - शिरसः मूर्धातः शिरः स्थानम्, कण्ठः, उरः इति । अत्र कण्ठपदेन ओष्ठप्रभृति आकाकलपर्यन्तरूपकण्ठान्तर्गतस्थानमात्रं गृह्यते । मन्त्रेऽस्मिन् वृषभः शब्दप्रतिपादकः । वर्षणात् = ज्ञानपूर्वकानुष्ठानफलत्वात् कामानां वर्षणात् वृषभः शब्दः । अत्र 'वृषु सेचने'[15] इत्येतस्मात् 'ऋषिवृषिभ्यां कित्'[16] इत्यौणादिकोऽभच् । लौकिको वृषभो वर्षतीति इत्युक्ते मूत्रेण भूमिं सिञ्चतीत्येतावदेव लोकप्रसिद्धम् । अयं शब्दरूपो वृषभः सर्वान् कामान् वर्षति । यतो हि ज्ञानपूर्वककर्मानुष्ठानात् हि काम्यसिद्धिः, ज्ञानञ्च व्याकरणज्ञानानुपूर्वकं वेदादिवाचनम् 'एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुग्भवति'[17] इति श्रुत्या कामवर्षणस्योक्तत्वात् । अनया रीत्या एव मोक्षसिद्धिः भवति ।

एषः वृषभः नानाविवर्त्तशब्दैः व्यवहारं सम्पादयति, शब्दं करोति च महान् परब्रह्मस्वरूपः अन्तर्यामी शब्दः मरणधर्माणं प्रविष्टवान् । तस्य यथावज्ज्ञानेन उपासनेन च तत्सायुज्यं प्राप्नोति, तथा च हरिरप्याह -

**अपि प्रयोक्तुरात्मानं शब्दमन्तरमवस्थितम् ।**
**प्राहुर्महान्तं वृषभं येन सायुज्यमश्नुते ॥**[18] **इति**

श्रुतिश्च - 'सूक्ष्मामर्थेनाऽप्रविभक्ततत्वामेकां वाचमभिष्यन्दमानाम्, तामन्ये विदुरन्यामिव च नानारूपामात्मनि सन्निविष्टाम्' इति । तथा च 'शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति'[19] इत्यनेन मन्त्रेण शब्दज्ञानां वैयाकरणानां सायुज्यरूपमोक्षः प्रतिपद्यते।

- केचिदर्थान्तरं ब्रुवते - अस्य ब्रह्मणः चत्वारि ऋग्यजुःसामाथर्ववेदाख्यानि, शृङ्गस्थानीयानि, त्रयः कर्मोपासनाज्ञानाख्याः पादाः, द्वे जीवेशरूपे शीर्षे, सप्त भूर्भुवः स्वर्महोजनतपः सत्याख्याः अतलवितलसुतलतलातलरसातलपातालमहातलाख्याश्च हस्तासः करद्वयस्थानीयाः, त्रिधा रजः सत्वेमोगुणैः बद्धः, वृषभः वृषभस्थः शिवः कल्याणमयः रोरवीति कथयति इत्यर्थः ।
- वेदान्तिनः ब्रह्मणः लक्षणमाहुः - अस्य वृषभस्य ब्रह्मणः चत्वारि शृङ्गा मनोबुद्धिरहङ्कारश्चित्तञ्चेति, त्रयः पादाः ज्ञानं कर्मोपासना चेति, द्वे शीर्षे त्रिपाद एकपादश्चेति, सान्तोऽनन्तश्चेति वा । सप्त हस्तासः सप्तप्राणाः, त्रिधा त्रिप्रकारेणसत्त्वर- जस्तमोभिर्बद्ध इति ।

**प्रसङ्गः -**

भगवद्भिः विरचिते महाभाष्ये व्याकरणाध्ययनस्य प्रयोजककथनावसरे चत्वारि इति अष्टमप्रयोजनमुक्तम् । भाष्ये 'चत्वारि' इतिपदघटितं मन्त्रद्वयमुदाहृतम्, अनेन व्याकरणमधीत्य मोक्षसिद्धिः कथमिति दर्शितम् । तत्र द्वितीयमन्त्रे विद्यते -

**चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ।**

Scanned with CamScanner

गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ॥

**मन्त्रसन्दर्भः -** ऋग्वेदः - मण्डलम् - 1, सूक्तम् - 164, मन्त्रसंख्या - 45, ऋषिः - दीर्घतमा औचथ्यः, देवता - वाक् ।

**अन्वयः -** चत्वारि वाक्परिमिता पदानि तानि ये ब्राह्मणा मनीषिणः विदुः, गुहा त्रीणि निहिता न इङ्गयन्ति मनुष्या वाचः तुरीयं वदन्ति ।

**पदार्थः -** चत्वारि - चतुःसंख्यकानि ।

**वाक्परिमितानि -** वाचः परिमितानि = परिच्छिन्नानि परिगणितानि एतावन्ति एव इति वाक्परिमितानि।

**पदानि** - पदजातानि ।

**तानि** - सर्वनाम्नः पूर्वपरामर्शकत्वात् पदजातानि इत्यर्थः ।

विदुः - विदन्ति, जानन्ति ।

ब्राह्मणाः - ब्रह्म = साङ्गोपाङ्गवेदं विदन्तीति ब्राह्मणाः ।

मनीषिणः - मनसः ईषिणो मनीषिणः = चित्तस्य वशीकर्त्तारः ।

गुहा - गुहायाम् अज्ञानरूपिगुहायाम् = हृदि ।

त्रीणि - त्रिसंख्यकानि ।

निहिता - निहितानि, निरुद्धानि ।

न इङ्गयन्ति - न चेष्टन्ते, न निमिषन्तीत्यर्थः ।

तुरीयम् - चतुर्थम् ।

वाचः - वाण्याः ।

मनुष्याः - मानवाः ।

वदन्ति - भाषन्ते, कथयन्ति ।

**वाक्यार्थः**- वाचः शब्दस्य चत्वारि परिच्छिन्नानि पदजातानि = नामाख्यातोपसर्गनिपातरूपाणि, परापश्यन्तीमध्यमावैखरीरूपाणि च तानि ये ब्राह्मणाः साङ्गोपाङ्गवेदं विदन्ति वैयाकरणाः मनीषिणः = मनसः संयमिनः जानन्ति ।

अवैयाकरणानां तदज्ञाने हेतुः द्वितीयपङ्क्तौ उक्तम् - गुहायामज्ञानरूपायां मूलाधार-नाभि-हृदयरूपायाञ्च, त्रयाणां नामादीनामंशचतुष्टयान्तर्गतमंशत्रयं, परा-पश्यन्ती- मध्यमात्रयञ्च निहितं निरुद्धम्, अत एव न प्रकाशते । मनुष्याः = अवैयाकरणाः वाचः नामादिरूपायाः तुरीयं चतुर्थांशमात्रं वदन्ति । तथाच परादिरूपायाः वाचः तुरीयं वैखरीमात्रं वदन्ति ।

**व्याख्यानविशेषः -**

मन्त्रघटकपरिमिता इत्यस्य परिमितानि इत्यर्थः, अत्र 'शेशछन्दसि बहुलमि'[20] ति शेर्लोपे परिमितेति सिद्ध्यति । परिमितत्त्वं परिमाणवत्त्वं शब्दे न सम्भवति, अत आह कैयटेन प्रदीपे (वागिति 'सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः'[21] इति लुप्तषष्ठ्यन्तमुक्तम् इति)

Scanned with CamScanner

परिच्छेदकत्वात् संख्यापि परिमाणमित्युच्यते इति । परिच्छिन्नानि परिगणितानि एतावन्ति एव इत्यर्थः । वाक्परिमितानि इत्यत्र नागेशेन वाचः परिमितानि इति षष्ठीतत्पुरुषः स्वीक्रियते, अन्ये विद्वान्सः अत्र प्रथमान्तपदं स्वीकुर्वन्ति, यतो हि अत्र भिन्नभिन्नस्वराः दृश्यन्ते, एकपदं भवति चेत् शेषनिघातो भूत्वा एक एव स्वरः शिष्यते । भाष्ये चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च इत्यत्र चकारग्रहणेन श्रीनागेशेन उद्योते परापश्यन्तीमध्यमावैखर्यः गृह्यन्ते । तत्र परादीनां परिचयोयथा -

**'परा वाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता ।**
**हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा ॥'[22] इति ॥**

**परा वाक्** - मूलाधारस्थपवनसंस्कारीभूता मूलाधारस्था शब्दब्रह्मरूपा स्पन्दशून्या बिन्दुरूपिणी परा वागुच्यते । वागुच्यते ।[23]

**पश्यन्ती वाक्** - नाभिपर्यन्तमागच्छता तेन वायुनाऽभिव्यक्ता मनोगोचरीभूता पश्यन्ती वागुच्यते ।[24]

**मध्यमा वाक्** - हृदयपर्यन्तमागच्छता तेन वायुनाऽभिव्यक्ता तत्तदर्थवाचकशब्दस्फोटरूपा श्रोत्रग्रहणाऽयोग्यत्वेन सूक्ष्मा जपादौ बुद्धिर्निर्ग्राह्या मधयमा वागुच्यते ।[25]

**वैखरी वाक्** - आस्यपर्यन्तमागच्छता तेन वायुनोर्ध्वमाक्रामता च मूर्धानमाहत्य परावृत्य च तत्तत्स्थानेष्वभिव्यक्ता परश्रोत्रेणापि ग्राह्या वैखरी वागुच्यते ।[26]

मन्त्रोक्तमनीषिण इति पदस्य श्रीमद्भगवता पतञ्जलिना मनसः ईषिणः मनीषिणः इति विगृह्यते, नागेशास्तु चित्तशुद्धक्रमेण वशीकर्त्तारो विषयान्तरेभ्यो व्यावृत्त्या हिंसका वा इति निर्दिदिशुः । कैयटास्तु अस्य पृषोदरत्वात्साधुत्वं प्रतिपादयाञ्चक्रुः । अर्थात् धातूनामनेकार्थतया वशीकरणर्थतां भजते, 'ईष उञ्छे'[27] इत्यस्य 'ईश ऐश्वर्ये'[28] इत्यस्य वा पृषोदरत्वा[29] त्यान्ततामाश्रयन्तो मनीषिणः इति सिद्धयते । शब्दोऽयं 'ईष गतिहिंसादर्शनेषु'[30] इति धातोरपि निष्पद्यतेऽत आह - हिंसका इति, मनसो विषयान्तरव्यावृत्तिरेव हिंसाऽस्ति । रत्नप्रकाशकारस्त्वत्रमनसः ईषिणः इति सम्बन्धसामान्ये षष्ठी, मनसा व्याकरणसंस्कृतेन ईषन्ते सर्वं जानन्तीति भावः । मनश्शब्दे तृतीयान्त उपपदे ज्ञानार्थात् 'ईष गतिहिंसादर्शनेषु'[31] इति भ्वादौ पठितात् 'सुप्यजातौ णिनिस्ताच्छील्ये'[32] इति णिनिः । पृषोदरादित्वात्[33] सलोपः। शकन्धवादित्वात्पररूपम् ।[34] मन्त्रोक्तगुहा इत्यस्य गुहायामित्यर्थः, 'सुपां सुलुक्पूर्वसवर्णाच्छे-याडाड्यायाजालः'[35] इत्यनेन ङेर्लुप्यते । तुरीयमित्यत्र तु 'चतुरश्छयतावाद्यक्षरलोपश्च'[36] इति छप्रत्यये सति सिद्धयति ।

विदुषामविदुषाञ्चेयानेव भेदो वर्त्तते - ये विद्वान्सः सन्ति, ते नामाख्यातोपसर्गनिपातांश्चतुरो जानन्तीति भावः । तेषां त्रीणि ज्ञानस्थानानि विद्यन्ते, चतुर्थं सिद्धं शब्दसमूहं प्रसिद्धे व्यवहारे वदन्ति च । ये चाविद्वान्सः ते केवलं निपातरूपं साधनज्ञानरहितं सिद्धशब्दं प्रयुञ्जते । तस्मात् निपातशब्दोऽत्र न पाणिनीयसङ्केतसम्बन्धेन निपातपदसञ्ज्ञकः

Scanned with CamScanner

अपितु सिद्धशब्दवाचकः । अर्थात् अविद्वांसः शास्त्रीयप्रक्रियां न विदन्ति, ते प्रक्रियाज्ञानशून्यं सिद्धशब्दमेव प्रयुञ्जते ।

**निरुक्ते तु मन्त्रार्थः**[37] –

नामाख्यातोपसर्गनिपाताः वाचः । अत्र 'सुपांसुलु- क्पूर्वसवर्णाच्छेयाडाड्यायाजालः'[38] ङसो लुक्, परिमाणयुक्तानि वेदितुं योग्यानि जानन्ति व्याकरणवेदेश्वरवेत्तारः मनसो दमनशीलाः । गुहायां बुद्धौ नामाख्यातोपसर्गाः धृताः, न चेष्टन्ते, चतुर्थं निपातं वाण्याः साधारणजनाः उच्चारयन्ति । निरुक्तेऽस्य मतान्तराण्यपिनिर्दिश्यन्ते, तदनुसारं व्यक्तिभेदेन पदजातस्य भेदः परिलक्ष्यते । तद्यथा – ऋषीणाम् – ओंकारः, भूः, भुवः, स्वः इति महाव्याहृतीनाम् ।

**याज्ञिकानाम्** – मन्त्रः, कल्पः, ब्राह्मणम्, व्यावहारिकी वाक् च ।

**नैरुक्तानाम्**- ऋक्, यजुः, साम, व्यावहारिकी वाक् च ।

**अन्याचार्याणाम्** – सर्पाणां पक्षिणां क्षुद्रसरिसृपाणाञ्च वाक्, व्यावहारिकी वाक् च ।

**प्रसङ्गः** – व्याकरणाध्यनस्य प्रयोजकवचनेषु भगवता शेषेण नवमं प्रयोजकमुतत्वः इत्युदाहृतम् । अस्मिन् मन्त्रे वागधिष्टातृदेवताप्रसादजनकत्वं व्याकरणाध्ययनेन साध्यते –

**उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम् ।**
**उतो त्वस्मै तन्वं विसस्रे जायेव पत्य उशती सुवासाः ॥**

**मन्त्रसन्दर्भः** – ऋग्वेदः – मण्डलम् – 10, सूक्तम् – 71, मन्त्रसंख्या – 4, ऋषिः-बृहस्पतिः, देवता – ज्ञानम् ।

**अन्वयः** – उत त्वः पश्यन् न ददर्श, उत त्वः शृण्वन् एनां वाचं न शृणोति, उतो त्वस्मै सुवासाः पत्ये उशती जाया इव तन्वं (वाग्देवी) विसस्रे ।

पदार्थः – उत – अप्यर्थकः ।

त्वः – अन्यवाचकः (अवैयाकरणः) ।

पश्यन् – वक्तुर्व्यवहारं साक्षात् कुर्वन् ।

न ददर्श – न पश्यति ।

वाचम् – वाणीम् ।

उत – अप्यर्थकः ।

त्वः – अन्यवाचकः ।

शृण्वन् – श्रोत्रेन्द्रियेण साक्षात्कुर्वन् ।

न शृणोति – न श्रवणविषयीकरोति (प्रकृतिप्रत्ययविभागेन साकल्येन न जानाति) ।

एनाम् – वाचम् ।

उतो – उत उ इति निपातसमुच्चयः आश्चर्यसूचकः ।



Scanned with CamScanner

त्वस्मै - अन्यस्मै वैयाकरणाय ।

तन्वं - शरीरम् ।

विसस्रे - विवृणुते ।

जाया इव - 'भार्या जायाऽथ पुंभूम्नि दाराः' इत्यमरः[39] पत्नी इव ।

पत्ये - भर्त्रे ।

उशती - कामयमाना ।

सुवासाः - शोभनं निर्णिक्तं वासः वसनं यस्याः रजोनिर्मुक्तिस्नानानन्तरं परिहि-तधौतवसना ।

**वाक्यार्थः -**

केचित् पश्यन्नपि स्वभ्यस्ताध्ययनोऽपि तीक्ष्णबुद्धिरपि सन्न पश्यति अर्थानभिज्ञत्वात्। एवमेकः शृण्वन्नपि न शृणोत्येनां वाचम् (य एव ह्यर्थं सम्यगवबुद्ध्यते तेनैव सा सम्यक् श्रुता भवति) । एवमर्द्धेनाविद्वान्सं निन्दित्वाऽर्धान्तरेण विद्वान्सं स्तौति - अप्येकस्मै कस्मैचिद् वैयाकरणाय तन्वं शरीरं विवृणोति प्रकाशयति । यथा - निर्णिक्तवासा जाया विवृतसर्वाङ्गावयवाभूत्वोशती कामयमाना भर्त्रे प्रेम्णा दर्शयत्यात्मानम् ।

**व्याख्यानविशेषः** - अस्यां ऋचि पूर्वार्द्धेनार्थस्य अनभिज्ञानां निन्दा, उत्तरार्द्धेन तु अर्थाभिज्ञानां स्तुतिर्वर्त्तते । अस्यां पूर्वार्द्धे वाचः द्वौ निर्दिशतः । एकस्तु वाण्याः श्यस्वरूपम्, अपरस्तु अस्याः श्रव्यस्वरूपञ्च । वाण्याः - श्यस्वरूपं लिप्यात्मकम्, अस्याः श्रव्यस्वरूपन्तु ध्वन्यात्मकं वर्त्तते ।

केचन पाश्चात्त्यविद्वान्सः - 'आर्याः लिपिं न जानन्ति स्म' वेदस्य श्रुतिः इति नामान्तरमेव अस्य लिप्यभावस्य प्रामाण्यमिति वदन्ति । तन्न, वेदस्य पठनं गुरुमुखात् मन्त्रश्रवणपूर्वकमेव भवति इति रीत्याऽपि अस्य नाम श्रुतिः इति भवितुमर्हति । गुरुमुखात् अध्ययनपरम्परायास्तु बहूनि प्रयोजनानि सन्ति, तत्रैकन्तु एतदपि दृश्यते यत् पाठान्तरमाधिक्येन न भवति इति । यद्वा छात्रस्य बुद्धेः तैक्ष्ण्यार्थमपि श्रुतिपरम्परया एव पाठयाञ्चक्रुः । एवञ्च सः विद्वान् एवैनां वाचं पदशः प्रकृतिप्रत्ययविभागेन विगृह्यार्थमेनां पश्यति शृणोति चेत्यर्थः । अत्र वागर्थयोः तादात्म्यमपि द्योतितम् - अप्यर्थक उत इत्यव्ययेन । अर्थात् उभयोः तादात्म्यात् उभयज्ञानमावश्यकं ध्वनिं श्रुत्वा झटिति अर्थस्य ज्ञानं भवेत्, किन्तु एवं वैयाकरणानां कृते एव साध्यम् । यतो हि व्याकरणाध्ययनं विना शब्दश्रवणेन परिष्कृतार्थबोधभावात् पशुपक्षिणां रववत् व्यर्थः एव ।

अत्र मन्त्रे ददर्श, विसस्रे इति लिड्लकारप्रयोगौ उक्तौ, छान्दसत्वात् 'छन्दसि लुङ्लङ्लिटः'[40] इति वर्त्तमाने व्यत्ययेन लड्लकारस्य स्थाने लिड्लकारः प्रयुक्तः । सुवासाः[41]= शोभने वाससी यस्याः सा । त्वशब्दोऽन्यवाचकः सर्वनामशब्दः, तस्य चतुर्थीविभक्तौ त्वस्मै इति रूपं भवति । मन्त्रेऽस्मिन् एक उतशब्दो निश्चयवाचकः, द्वितीयः

Scanned with CamScanner

अप्यर्थकः विद्यते । तन्वमित्यत्र छान्दसत्वात् 'अमि पूर्वः'[42] इत्यत्र 'वा छन्दसि'[43] इत्यनुवृत्त्या तन्वमित्यत्र यणादेशः भवति । सावाग्देवी विवृणुते इत्यस्य कठोपनिषदि प्रमाणन्तु – 'यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम्' इति श्रुत्या उपास्योपासकयोरभेदावस्थायामुपास्यं स्वयमेव स्वस्वरूपमुपासकाय प्रकाशयति इति बुद्ध्यते ।

**प्रसङ्गः** – व्याकरणाध्ययनस्य गौणप्रयोजनेषु सक्तुमिव इति दशमप्रयोजने एष मन्त्रेदाहृतः ।

**सक्तुमिव तितउनापुनन्तो यत्र धीरा मनसा वाचमक्रत ।**
**यः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधिवाचि ॥**

**मन्त्रसन्दर्भः** – ऋग्वेदः – मण्डलम् – 10, सूक्तम् – 71, मन्त्रसंख्या – 2,

**ऋषिः** – बृहस्पतिः, देवता – ज्ञानम् ।

**अन्वयः** – तितउना सक्तुमिव पुनन्तः यत्र धीराः मनसा वाचम् अक्रत । अत्र सखायः सख्यानि जानते एषां लक्ष्मीः भद्रा निहिता ।

**पदार्थः** – सक्तुम् इव – सक्तुरिति पिष्टान्नविशेषः, तदिव ।

**तितउना** – चालन्या ।

पुनन्तः – तुषराहित्यं सम्पायन्तः ।

यत्र – यस्यां वाचि ।

धीराः – ध्यानशीलाः ।

मनसा – साध्वसाध्ववधानेन ।

वाचम् – अपभ्रंशरहितां वाणीम् ।

अक्रत – कृतवन्तः ।

अत्र – अस्याम् वागधिष्ठातृदेवतायाम् ।

सखायः – सख्यं प्राप्ताः ।

सख्यानि – सायुज्यानि ।

जानते – अनुभवन्ति ।

भद्रा – निश्रेयस्कारिणी ।

एषां – सख्यभावयुतां सायुज्यशालिनाम् ।

लक्ष्मीः – परमार्थसंविद्रूपा ।

निहिता – सन्निहिता भवति ।

अधिवाचि – वेदान्तादौ वर्ण्यमाना ।

**वाक्यार्थः** – चालन्या सक्तुमिव पुनन्तः, वाचि ध्यानशीलाः प्रज्ञानेन अपभ्रंशरहितां वाणीं कृतवन्तः। अस्यां वागधिष्ठातृदेवतायां सख्यभावं प्राप्ताः सायुज्यानि अनुभवन्ति, एषां सख्यभक्तिमतां सायुज्यशालिनां वेदान्तादौ वर्ण्यमाना लक्ष्मीः परमार्थसंविद्रूपा निःश्रेयस्करी सन्निहिता भवति ।

Scanned with CamScanner

**व्याख्यानविशेषः -**

मन्त्रोक्तसक्तुरिति शब्दः भाष्यकारेण द्विधा साध्यते -

सचतेर्दुर्धावो भवति - सच् धातोः - 'षच सेचने'[44], 'षच समवाये'[45] इति धातुभ्यां कर्मणि औणादिके तुनि कत्वे च सक्तुरिति निष्पन्नः, दुर्धावार्थबोधको भवति । दुर्धावः इत्यस्य दुःखेन धावयितुं योग्य इति व्युत्पत्तिः । अत्र दुःपूर्वाद्धावेः[46] 'ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खलु'[47] इति सूत्रेण कर्मणि खलि दुर्धावः इति सिद्धयति ।

यद्वा कसतेर्वा विपरीताद्विकसितो भवति - 'कस गतौ'[48] इत्यस्माद् विपरीतात् पृषोदरादित्वात्[49] वर्णव्यत्ययेन कर्मणि औणादिके तुनि सक्तुरिति निष्पन्नः, विकसितार्थ-बोधकः धातूनामनेकार्थत्वाद् भवति ।

मन्त्रोक्ततितउशब्दः चालनीबोधकः - 'चालनी तितउः पुमानिति' कोशात् ।[50] अत्र 'तनु विस्तारे'[51] इति धातोः 'तुद व्यथने'[52] इति धातोश्च 'तनोतेर्डः उः सन्वच्च'[53] इति औणादिकेन सूत्रेण सिद्धयति, अर्थस्तु ततवद् अर्थात् विस्तारयुक्तमित्यर्थः । तुन्नवत् इति नाम बहुच्छिद्रयक्तञ्च । अत्र विस्तारयुक्तत्वेन शूर्पादेः, छिद्रयुक्तत्वात् चालिन्याः ग्रहणम् । धीरा इति धाधातोः[54] औणादिकक्रनि 'घुमास्थागापाजहातिसां हलि'[55] इत्यनेन साधुः । अक्रतं इति तु 'मन्त्रे घसह्वरणशवृदहाद्वृच्कृगमिजनिभ्यो लेः'[56] इत्यनेन च्लिप्रत्ययस्य लुकि सति यणादेशे सिद्धयते । अत्र इत्यत्र 'ऋचि तनुघमक्षुतङ्कुत्रेरुष्याणाम्'[57] इति दीर्घः । लक्ष्मीरिति तु 'लक्ष दर्शनाङ्कनयोः'[58] इति धातोः 'लक्षेर्मुट् च'[59] इत्यनेन औणादिकमुडागमे ईत्वे च कृते सिद्धयते। भासनार्थकशब्दोऽयम् ।

**अयं निष्कर्षः -**

ये ब्रह्मणि विषये वाणीं वेदरूपां व्याकरणाध्ययनेन परिष्कृतवन्तः, ते 'शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति'[60] इति सायुज्यरूपं मोक्षं प्राप्नुवन्ति । एषा ज्ञानरूपा लक्ष्मीः वेदान्तेषु निर्दिष्टाऽऽस्ते । वाक्यार्थज्ञाने पदज्ञानं कारणमिति धिया वेदान्तवाक्यार्थानां व्याकरणाध्ययनाधीनत्वात् व्याकरणमवश्यमध्येयमिति ।

**प्रसङ्गः -**

श्रीमच्छेषावतारेण पतञ्जलिना महाभाष्ये व्याकरणस्यान्तिमगौणप्रयोजनत्वेन मन्त्रोऽयं प्रस्तुतः ।

**सुदेवो असि वरुण यस्य ते सप्त सिन्धवः । अनुक्षरन्ति काकुदं सूर्म्यं सुषिरामिव ॥**

**मन्त्रसन्दर्भः** - ऋग्वेदः - मण्डलम् - 8, सूक्तम् - 69, मन्त्रसंख्या -12, ऋषिः - प्रियमेधः, देवता - वरुणः ।

**अन्वयः** - वरुण ! सुदेवः असि, यस्य ते सप्त सिन्धवः काकुदम् अनुक्षरन्ति सुषिरां सूर्म्यम् इव।

**पदार्थः**-सुदेवः - सत्यदेवः ।

Scanned with CamScanner

असि - वर्त्तसे ।

वरुण - वरुणदेव !

यस्य - पञ्चम्याः स्थाने व्यत्ययेन षष्ठी = यस्मात् हेतोः इत्यर्थः ।

ते - 'सर्वनाम्नां बुद्धिस्थपरामर्शित्वात्' ते इत्यस्य सप्त सिन्धवः इत्यर्थः ।

सप्त - सप्तसंख्यकाः ।

सिन्धवः - समुद्राः ।

सूर्म्यम् - 'सूर्मिः स्थूणाऽयः प्रतिमायामि'ति कोशः ।[61]

सुषिरामिव - सुच्छिद्राम् इव ।

**वाक्यार्थः -**

हे वरुण ! सत्यदेवोऽसि । यस्मात् सप्त विभक्तितुल्याः सिन्धवः तालु प्राप्य प्रकाशन्ते । तालुस्थापशब्दान् अपाकुर्वन्ति । यथा सुच्छिद्रामयः प्रतिमामग्निः प्रविश्य तत्रत्यं मलं भस्मीकृत्य तां प्रतिमां परिष्करोति ।

**व्याख्यानविशेषः -**

मन्त्रेऽस्मिन् सुदेवो असि इत्यत्र 'प्रकृत्याऽन्तः पादमव्यपरे'[62] इति सूत्रेण प्रकृतिभावात् 'एङः पदान्तादति'[63] इति सूत्रेण पूर्वरूपं न भवति । सूर्म्यमित्यत्र सूर्मीमिति भवति, अत्र 'अमि पूर्वः'[64] इत्यत्र 'वा छन्दसि'[65] इत्यनुवृत्त्या व्यत्ययेन यणादेशो वर्त्तते । दीव्यते[66] द्योत्यते इति देवः, व्याकरणाध्ययनाद्यथा वरुणः सत्यदेवत्वमवाप्य स्वर्गे वसति, तथैव वैयाकरणाः अपि देवत्वमाप्नुवन्ति । अर्थात् यथा व्याकरणज्ञानेन जन्यपुण्यविशेषाद् वरुणेन सत्यदेवत्वमवापि तथैव सर्वैः व्याकरणज्ञानेन शारीरमलमपाकृत्य स्वर्गः प्राप्यते ।

**सन्दर्भाः**


1. मनुस्मृतिः 1.125 ।
2. स्पश बाधस्पर्शनयोः इति धातोः पुनः अतिशयेन वा स्पशतीति विग्रहे यङ्लुगन्तात् पस्पशधातोः अचि टापि पस्पशा - उपोद्घातः इत्यर्थः ।
3. व्याकरणमहाभाष्यम्, प्रथमाह्निकम्, पृ. सं. 3 ।
4. व्याकरणमहाभाष्यम्, प्रथमाह्निकम्, पृ. सं. 13 ।
5. व्याकरणमहाभाष्यम्, प्रथमाह्निकम्, पृ. सं. 17 ।
6. अनाम्नातेष्वमन्त्रत्वम् पू. मी. 2.1.34 ।
7. अमरकोशः द्वितीयकाण्डम्, मनुष्यवर्गः - 95, पृ. सं. 236 ।
8. दिवादिगणे 'दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदनमदस्वप्नकान्तिगतिषु' - 11 ।
9. अष्टाध्याय्यां 6.1.68 ।
10. अष्टाध्याय्यां 7.1.39 ।
11. वाक्यपदीयम्, ब्रह्मकाण्डम् - 44, पृ. सं. 100 ।


Scanned with CamScanner

12. अष्टाध्याय्यां 6.1.68 ।
13. व्याकरणमहाभाष्यम्, पस्पशाह्निकम्, पृ. सं. 24 ।
14. आपिशलशिक्षा 8.24/पाणिनीयशिक्षा 8.28 ।
15. भ्वादिगणे 468 ।
16. उणादिकोशः, 3.123, पृ. सं. 270 ।
17. इयं श्रुतिः 6.1.84 सूत्रे महाभाष्ये उदाहृता ।
18. ब्रह्मकाण्डम्, 122 - 130, पृ. सं. 199 ।
19. ब्रह्मबिन्दूपनिषद 17 ।
20. अष्टाध्याय्यां 6.1.68 ।
21. अष्टाध्याय्यां 7.1.39 ।
22. परमलघुमञ्जूषा, स्फोटनिरूपणम् ।
23. परमलघुमञ्जूषा, स्फोटनिरूपणम् पृ. सं. 91 ।
24. परमलघुमञ्जूषा, स्फोटनिरूपणम् पृ. सं. 91 ।
25. परमलघुमञ्जूषा, स्फोटनिरूपणम् पृ. सं. 91 ।
26. परमलघुमञ्जूषा, स्फोटनिरूपणम् पृ. सं. 91 ।
27. भ्वादिगणे 461 ।
28. अदादिगणे 10 ।
29. पृषोदरादीनि यथोपदिष्टम् - अष्टाध्याय्यां 6.3.108 ।
30. भ्वादिगणे 406 ।
31. भ्वादिगणे 406 ।
32. अष्टाध्याय्यां 3.2.78 ।
33. पृषोदरादीनि यथोपदिष्टम् - अष्टाध्याय्यां 6.3.108 ।
34. शकन्ध्वादिषु पररूपं वाच्यम् ।
35. अष्टाध्याय्यां 7.1.39 ।
36. वार्त्तिकं षट्कतिकतिपयचतुरां थुक् ।
37. 13.9.45 ।
38. अष्टाध्याय्यां 7.1.39 ।
39. अमरकोषः, द्वितीयकाण्डम्, मनुष्यवर्गः, 6 पृ. सं. 204 ।
40. अष्टाध्याय्यां 3.4.6 ।
41. बहुव्रीहिसमासः ।
42. अष्टाध्याय्यां 6.1.103 ।
43. अष्टाध्याय्यां 6.1.102 ।

Scanned with CamScanner

44. भ्वादिगणे 97 ।
45. भ्वादिगणे 723 ।
46. भ्वादिगणे 397 ।
47. अष्टाध्याय्यां 3.3.126 ।
48. भ्वादिगणे 599 ।
49. पृषोदरादीनि यथोपदिष्टम् - अष्टाध्याय्यां 6.3.108 ।
50. अमरकोषः द्वितीयकाण्डम्, वैश्यवर्गः, 26, पृ. सं. 310 ।
51. तनादिगणे 1 ।
52. तुदादिगणे 1 ।
53. उणादिकोषः, 5.52, पृ. सं. 470 ।
54. जुहोत्यादिगणे 'डुधाञ् धारणपोषणयोः' 10 ।
55. अष्टाध्याय्यां 6.4.66 ।
56. अष्टाध्याय्यां 2.4.80 ।
57. अष्टाध्याय्यां 6.3.132 ।
58. चुरादिगणे 5 ।
59. उणादिकोषः, 3.160 ।
60. बिन्दूपनिषद् 17 ।
61. अमरकोषः, द्वितीयकाण्डम्, शूद्रवर्गः - 35, पृ. सं. 349 ।
62. अष्टाध्याय्यां 6.1.111 ।
63. अष्टाध्याय्यां 6.1.105 ।
64. अष्टाध्याय्यां 6.1.103 ।
65. अष्टाध्याय्यां 6.1.102 ।
66. दिवादिगणे 'दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिपु' । ।

## उपयुक्तग्रन्थसूची


1. व्याकरणमहाभाष्यम्, षष्ठसंस्करणम्, चौखम्भाप्रकाशन, वाराणसी, सम्वत् - 2067
2. महाभाष्यम्, प्रथमसंस्करणम्, ईस्टर्न बुक लिंकर्स, दिल्ली, 1982.
3. व्याकरण महाभाष्यम, प्रथमसंस्करण, श्री मोतीलाल बनारसीदास, दिल्ली, सम्वत् - 2025.
4. पातञ्जलं महाभाष्यम्, द्वितीयं संस्करणम्, वाणीविलास प्रकाशन, वाराणसी, 1988
5. व्याकरणमहाभाष्ये नवाह्निकम्, पञ्चमं संस्करणम्, निर्णयसागरमुद्रणालयः, मुम्बई, 1951.
6. Critical studies on the MAHABHASHYA, by V.P. Limaye, V.V.R.I. press, Hoshiyarpur, 1974.


Scanned with CamScanner

7. महाभाष्यप्रदीपव्याख्यानानि - Institute FrancaisD'indologie, Pondichery, 1973.

8. व्याकरणमहाभाष्यम् (नवाह्निक), प्रदीपोद्योततत्त्वालोकटीकासमुल्लसितम्, षष्ठसंस्करणम्, चौखम्भाप्रकाशन, वाराणसी, सम्वत् - 2067.

9. मनुस्मृतिः (सान्वयानुवादमनुभाष्यभासिकाभावावगाहिनी भाषाटीकोपेता), प्रथम संस्करणम्, जे. पी. पब्लिशिंग हाउस, दिल्ली, 2004.

10. अमरकोषः, (रामाश्रमीसुधाटीकासहितः), द्वितीयसंस्करणम्, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, 1987.

11. महाभाष्यम् (हिन्दीव्याख्यया सहितम्), युधिष्ठिरमीमांसकाः, प्रथमसंस्करणम्, श्री प्यारेलाल द्राक्षादेवी न्यास (ट्रस्ट), दिल्ली, वि.सं.2029.

12. संस्कृत व्याकरण मे गणपाठ की परम्परा और आचार्य पाणिनि, प्रथमावृत्ति, भारतीय-प्राच्यविद्या-प्रतिष्ठान, वि.सं. 2018.

13. VAKYAPADEEYA OF BHARTIHARI with the Vritti and the PADDHATI OF VRISHABHADEVA, Poona-1966.

14. उपनिषदायन, माधवानन्द मैनाली 'मधु', प्रथमसंस्करणम्, ईस्टर्न बुक लिंकर्स, दिल्ली, 2013.

15. ऋग्वेदसंहिता, डा.जियालाल कम्बोज, प्रथमसंस्करण, विद्यानिधि प्रकाशन, दिल्ली, 2010.

16. पाणिनीयः अष्टाध्यायीसूत्रपाठः, सप्तदशं संस्करणम्, राधाप्रेस, दिल्ली, 2005.

17. धातुपाठः, षष्ठसंस्करणम्, मन्त्री रामलाल कपूर ट्रस्ट, सोनीपत, 2000.

18. परमलघुमञ्जूषा (किरणावली-संस्कृतव्याख्योपेतहिन्द्यानुवादसहिता), पुनर्मुद्रित-संस्करणम्, चौखम्बा सुरभारती प्रकाशन, 2011.

19. वैयाकरणसिद्धान्तदिग्दर्शनम्, प्रो.बोधकुमारझाः, प्रथमसंस्करणम्, रचना प्रकाशन, जयपुर, 2006.

**उपयुक्तसंसाधनम्**

1. Online Ved 2.वाचस्पत्यम् । 3.शब्दकल्पद्रुमः ।

**शोधच्छात्रा, व्याकरणविभागः**
**राष्ट्रियसंस्कृतसंस्थानम्( मा.वि ),**
**क. जे. सोमैया संस्कृतविद्यापीठम्,**
**विद्याविहारः, मुम्बई ।**

❖❖❖

Scanned with CamScanner

विक्रमाब्दः 2074 खीस्ताब्दः 2017 ISSN No. 2457-0729
प्रथमोऽङ्कः

# वाग्वै ब्रह्म

(सन्दर्शिता मूल्याङ्किता च वार्षिकी राष्ट्रियशोधपत्रिका)

सृष्टौ या सर्गरूपा जगदवनविधौ पालिनी या च रौद्री,
संहारे चापि यस्या जगदिदमखिलं क्रीडनं या पराख्या।
पश्यन्ती मध्यमाऽथो तदनु भगवती वैखरीवर्णरूपा-
साऽस्मद्वाचं प्रसन्ना विधिहरिगिरिशाराधिताऽलङ्करोतु।।

व्याकरणविभागः
राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
(मानवसंसाधनविकासमन्त्रालयभारतसर्वकाराधीनम्)
क. जे. सोमैयासंस्कृतविद्यापीठम्
विद्याविहारः, मुम्बई-77

Scanned with CamScanner

# अनुक्रमणिका



| क्र. सं. | विषयः | लेखकः | पृष्ठाङ्कः |
|---|---|---|---|
| 1. | राष्ट्रियः, राष्ट्रीयो वा ? अथवा उभयम् ? | प्रो. अर्कनाथचौधरी | 01 |
| 2. | 'वृद्धिरादैच्' इतिसूत्रविमर्शः | प्रो. प्रकाशचन्द्रः | 04 |
| 3. | 'क्क्ङिति चे' ति सूत्रभाष्यविमर्शः | प्रो. बोधकुमारझाः | 13 |
| 4. | कृदन्तविमर्शः | डॉ. दयारामदासः | 24 |
| 5. | व्याकरणमहाभाष्यदृष्ट्या 'वृद्धिरादैच्' सूत्रविमर्शः | डॉ.अशोकचन्द्रगौडशास्त्री | 38 |
| 6. | महाभाष्यस्थः हलोऽनन्तराः संयोगः, इति सूत्रविचारः | प. सुभाषचन्द्रमीणा | 43 |
| 7. | प्रगृह्यसंज्ञासूत्रविमर्शः | डॉ. माधवदत्तपाण्डेयः | 46 |
| 8. | भाष्योक्तदिशा दाधा घ्वदाप्सूत्रविचारः | डॉ. नवीनकुमारमिश्रः | 56 |
| 9. | भाष्यानुसारी 'वृद्धिरादैच्' सूत्रविमर्शः | सुश्रीविदुषीबोल्ला | 65 |
| 10. | भाषाविज्ञानदृष्ट्या प्रयत्नविमर्शः | श्रीवेमटेसुरेशः | 74 |
| 11. | 'इको गुणवृद्धी' इत्यत्र इग्ग्रहणविचारः | श्रीमतीऋतम्भरापाण्डेयः | 88 |
| 12. | महाभाष्यदृशा 'इको गुणवृद्धी' सूत्रविमर्शः | श्रीसत्यराजरेग्मी | 95 |
| 13. | 'तुल्यास्यप्रयत्नं सवर्णम्' इत्यस्मिन् सूत्रे सावर्ण्यविचारः | आ. पद्मराजरेग्मी | 101 |
| 14. | महाभाष्ये शाबरभाष्ये च कृतः संज्ञाविचारः | श्रीधर अवधूतलोहोकरे | 106 |
| 15. | बाह्यप्रयत्नविवेकः | कु. मुग्धा चन्द्रकान्तदाते | 110 |
| 16. | महाभाष्यदृशा 'इको गुणवृद्धी'इति सूत्रविमर्श | श्रीसर्वेशकुमारतिवारी | 113 |
| 17. | 'न धातुलोप आर्धधातुके' इति सूत्रभाष्यविमर्शः | सुश्रीबिन्दुहासिनीमिश्रः | 117 |
| 18. | 'ईदूदेद्द्विवचनं प्रगृह्यम्' इति सूत्रभाष्यविमर्शः | सुश्रीआशा छेडा | 119 |
| 19. | 'ष्णान्ता षट्' इति सूत्रभाष्यविमर्शः | श्रीश्यामकिशोरपाण्डेयः | 123 |
| 20. | 'बहुगणवतुडति संख्या' इति सूत्रभाष्यविमर्शः | श्रीचन्द्रमापौड्यालः | 126 |
| 21. | 'निपात एकाजनाङ्' इति सूत्रभाष्यविमर्शः | श्रीउमेशत्रिवेदी | 130 |



❖❖❖

Scanned with CamScanner

# भाष्यानुसारी 'वृद्धिरादैच्' सूत्रविमर्शः

✍ सुश्रीविदुषीबोल्ला

अस्मिन् नामरूपात्मके जगति सर्वे व्यवहाराः शब्दैरेव जायन्ते । वाग्व्यवहारस्य व्यवस्थित्यै तेषां शब्दानामनुशासनमपेक्षितम्, तदर्थं महर्षिपाणिनिना कृत्स्नं व्याकरणं अष्टाध्यायी-रूपेण व्यलेखि । अष्टाध्याय्यां प्रायः-चतुःसहस्रसूत्राणि सन्ति । सूत्रत्वं च तावत् -

अल्पाक्षरत्वे सति असन्दिग्धत्वे सति सारवत्त्वे सति व्यापकार्थप्रकाशकत्वे सति अर्थविहीनशब्दराहित्ये सति विशुद्धसंरचनत्वञ्चेति ।

अष्टाध्याय्या आद्यं 'वृद्धिरादैच्'[1] इति सञ्ज्ञासूत्रमत्र विमर्ष्टव्यमस्ति । आधुनिक-शक्तिग्राहकत्वं सञ्ज्ञासञ्ज्ञिसम्बन्धबोधकत्वं वा सञ्ज्ञासूत्रत्वम् । सञ्ज्ञासूत्राणि विधिशास्त्रो-पकारकाणि भवन्ति । एतेषां विधिशास्त्रोपकारकत्वविषये शब्दशास्त्रे पक्षद्वयम् - यथोद्देशपक्षः, कार्य्यकालपक्षश्चेति ।

**यथोद्देशपक्षः -**

सञ्ज्ञासूत्राणां पक्षमनुमश्रित्य परिभाषेन्दुशेखरकृता भट्टनागेशेन 'यथोद्देशं सञ्ज्ञा-परिभाषमि'[2]ति परिभाषा पर्य्यभाषि । उद्देशश्चात्राधिकरणघञन्तत्वाद् उपदेशदेशः । तथा च यत्र देशे उपदिश्यते, तद्देश एव वाक्यार्थबोधेन गृहीतशक्त्या सर्वत्र शास्त्रे व्यवहारो यस्मिन् भवति स यथोद्देशपक्षः ।

**कार्य्यकालपक्षः -**

सञ्ज्ञासूत्राणां कार्य्यकालपक्षोपस्थापिका भवति 'कार्य्यकालं सञ्ज्ञापरिभाषमि'[3]ति परिभाषा। कार्य्येण = तद्विधायकशास्त्रेण काल्यते = स्वसन्निधिं प्राप्यते अर्थात् कार्य्येण स्वसंस्काराय स्ववृत्तिलिङ्गचिह्नितपरिभाषाविधेयानाम्, आक्षेपः = स्मरणं जायते यस्मिन् सः कार्य्यकालपक्षः।

लक्ष्यानुसारं द्वयोरन्यतरस्योभयस्य वाऽत्र शास्त्रे उपयोगो दृश्यते । तथा च सञ्ज्ञासूत्राणि यथोद्देशेऽपि त्रिपाद्यां प्रवर्त्तन्ते । अत एव 'पूर्वत्रासिद्धम्'[4] इति भाष्ये केवलं परिभाषाणां सम्बन्ध एव अप्रवृत्तिशङ्का कृता । सञ्ज्ञासूत्राणां विधिशास्त्रैः सह एकवाक्यतया वाक्यार्थः सम्पद्यते । सा च एकवाक्यता त्रिधा - पदैकवाक्यता, अर्थैकवाक्यता, वाक्यैकवाक्यता चेति ।



Scanned with CamScanner

**पदैकवाक्यता –**

'वृद्धिरादैजि'ति शास्त्रस्य पदोपस्थापकत्वपक्षे 'वृद्धिरेची'[5]त्यादिवृद्धिपदघटितशास्त्रैः सह स्वघटकपदप्रयोज्यविषयतानिरूपितविषयताप्रयोजकपदघटितत्वरूपेति ।

**अर्थैकवाक्यता –**

विधिशास्त्रीयवृद्धीत्यादिपदानां लक्षणया वृद्धिपदाभिन्नादैजित्याद्यर्थतात्पर्य्यकत्वरूपे स्वोप-स्थाप्यार्थनिष्ठविषयतानिरूपितविषयताप्रयोजकपदघटितत्वरूपेति ।

**वाक्यैकवाक्यता –**

उपजीव्योपजीवकभावापन्नबोधप्रयोजकत्वरूपेति ।

प्राचीनवैयाकरणानां मते सञ्ज्ञासूत्राणां विधिशास्त्रैः सह यथोद्देशपक्षे वाक्यैकवाक्यता, कार्य्यकाले च पदैकवाक्यता भवति । नव्यनये तूभयत्र पदैकवाक्यता एव गृह्यते । उभयत्र पदैकवाक्यतेत्यत्र प्रमाणन्तु 'षष्ठी स्थानेयोगे'[6] ति सूत्रस्थभाष्यमेव – 'कश्चिदकदेशस्थः सर्वं शास्त्रमभिज्वलयति यथा प्रदीपः सुप्रज्वलितः सर्वं वेश्माभिज्वलयतीति'[7] । दीपो यथा स्वावयव-प्रभासम्बद्धपदार्थप्रकाशकस्तथा सञ्ज्ञाशास्त्रमपि स्वावयवविधेयसम्बद्धमेव विधिशास्त्रमभि-ज्वलयतीत्यर्थः । अनेन दीपदृष्टान्तन्यायेन स्पष्टतया पदैकवाक्यता लभ्यते, वाक्यैकवाक्यतायान्तु अवयवसम्बन्धाभावात् भाष्यदृष्टान्ताऽसङ्गतिः स्यात् ।

सूत्रस्य विवेचनीयांशाः सन्ति –

1. सूत्राणां छन्दोवत्त्वम् ।
2. सूत्रस्थपदविचारः ।
3. तद्भावितातद्भावितानां स्वीकरणम् ।
4. पाणिनीयसूत्राणां वैशिष्ट्यम् ।
5. वृद्धिशब्दस्य मङ्गलार्थत्वम् ।
6. इतरेतराश्रयदोषनिवारणम् ।
7. समुदितसञ्ज्ञानिराकरणम् ।
8. तपरकरणविचारः ।
9. प्रकृतसूत्रवाक्यार्थः ।

एतेषां क्रमशः विवेचनमधः क्रियते –



Scanned with CamScanner

१. सूत्राणां छन्दोवत्त्वम् -

'वृद्धिरादैच्'[8] इति सूत्रस्य आदैजित्यत्र चकारस्य 'चोः कुः'[9] इत्यनेन कुत्वं तु 'अयस्मयादीनि छन्दसि'[10] इति सूत्रेण 'छन्दोवत्सूत्राणि भवन्तीति'[11] भाष्यकृतः इष्टिवचनेन भसञ्ज्ञत्वान्न भवति । इष्टिघटकसूत्रपदेन वेदस्याङ्गत्वात् पदपदार्थबोधनद्वारा वेदोपकारकत्वाच्च व्याकरणसूत्राणामेव ग्रहणं क्रियते न तु वैशेषिकादिसूत्राणाम् । वेदाङ्गत्वे प्रमाणन्तु पस्पशायां निरूपितम् - 'प्रधानञ्च षट्स्वङ्गेषु व्याकरणमिति', 'मुखं व्याकरणं स्मृतमि'त्यादि । तथा च 'छन्दोवत्सूत्राणि भवन्ती'ति भाष्यकारीयातिदेशात् सूत्रेष्वपि छन्दःकार्य्यप्रवृत्तिर्जायते । अत एव संहितापाठे 'वृद्धिरादैजदेङ्गुणः' इत्यत्र चकारस्य जश्त्वं पदसञ्ज्ञया विधीयते, यतो हि छन्दसि भपदसञ्ज्ञाद्वयनिमित्तकार्य्याणि एकत्रैव भवन्ति यथा 'स सुष्टुभास ऋक्वता गणेन' इत्यत्र पदत्वात्कुत्वम्, भत्वाज्जश्त्वाभावो विधीयते । तथैव प्रकृतेऽपि पदत्वाज्जश्त्वम्, भत्वात्कुत्वाभावः । न चात्र पदत्वात् कुत्वं भत्वाज्जश्त्वाभावश्चेति व्यत्यासः कर्त्तुं शक्यते छन्दसि दृष्टानुविधित्वात् । एवं रीत्या सूत्रस्यासाधुत्वं पतञ्जलिना निराकृतम् ।

२. **सूत्रस्थपदविचारः**

वाक्यार्थज्ञानं प्रति पदार्थज्ञानं कारणमतः 'वृद्धिरादैच्' इति वाक्यार्थज्ञानाय सूत्रघटकपदानां विचारः क्रियते । सूत्रेऽस्मिन् पदत्रयं पदद्वयमिति पक्षद्वयं वर्त्तते ।

**क. पदत्रयपक्षः -**

प्रकृतसूत्रे वृद्धिः, आत्, ऐच् इति पदत्रयं शेखरकृता स्वीकृतम् । आदैजिति समाहारद्वन्द्वेन पदद्वयस्वीकारे 'द्वन्द्वाच्चुदषहान्तात् समाहारे'[12] इति समासान्तटजापत्तिः स्यात्। किञ्च 'द्वित्रिभ्यां पाद्दन्मूर्द्धसु बहुव्रीहौ'[13] इत्यत्र 'द्वित्रिभ्यां ष मूर्ध्नः'[14] इत्यनेन षे मूर्द्धषु इति वक्तव्ये मूर्द्धसु इति निर्देशात् समासान्तविधिरनित्य इति ज्ञाप्यते, तस्यानित्यत्वात् समासान्तटच्प्रत्ययाभावन पदद्वये दोषाभावः इति न वक्तव्यम्, अनित्यस्य अगतिकगतित्वात् । न चात्र आच्च ऐच्चेति इतरेतरद्वन्द्वः स्वीकर्त्तुं शक्यः तेन द्विवचनापत्तिर्जायते । तथा चास्मिन् पक्षे वृद्धिपदस्य तन्त्रेण आवृत्त्या वा आत् ऐच् इति उद्देश्यद्वयेन सह अन्वयो विधीयते ।

**ख. पदद्वयपक्षः -**

सूत्रघटकादैच्पदे समाहारद्वन्द्वे आच्च ऐच्च तयोः समाहारः इति आदैजिति, समासेऽस्मिन् न टजापत्तिः, समासान्तविधेरनित्यत्वात् । एवञ्च आदैच्पदे इतरेतरद्वन्द्वे आच्च ऐच्चेति आदैजिति द्वितीयविभक्त्याः 'सुपां सुलुक्पूर्वसवर्णाऽऽच्छेयाडाड्याया-



Scanned with CamScanner

जालः'[15] इति सूत्रेण लुग्भवति । तथा च पक्षेऽस्मिन् उद्देश्यविधयपदयोः समानत्वात् तन्त्रवृत्त्योः अनाश्रयणाल्लाघवादयमेव पक्षो न्याय्यः।

**३. तद्भावितातद्भावितानां स्वीकरणम् -**

तद्भावितमित्यनेन वृद्धिशब्दमुच्चार्य्य ये आकारैकारौकाराः भाव्यन्ते तेषां ग्रहणं भवति । अतद्भावितेन आदैज्मात्रस्य ग्रहणं क्रियते । उभयथा शास्त्रे दर्शनात् पक्षद्वयेऽपि दोषसम्भवेन प्रश्नोऽयमुदितः । अत्र तद्भावितस्यादैचामेव ग्रहणं क्रियते चेत् शालीयः मालीयः इत्यत्र वृद्ध-लक्षणश्छप्रत्ययः 'वृद्धाच्छः'[16] इत्यनेन, आग्रमयम्, शालमयम् इत्यादौ 'नित्यं वृद्धशरादिभ्यः'[17] इत्यनेन मयड्प्रत्ययः, आम्रगुप्तायनिः, शालगुप्तायनिः इत्यादिषु 'उदीचां वद्धादगोत्रात्'[18] इति सूत्रेण फिञ्प्रत्ययो न भवन्ति । अतद्भावितपक्षस्वीकारे तु दोषद्वयमापद्यते, तौ भाष्यकृता एवं पर्य्यहा-रिपाताम् - तत्र प्रथमदोषस्तु 'सर्वो भासः सर्वभासः' इत्यत्र 'उत्तरपदवृद्धौ सर्वञ्च'[19] इत्यनेन पूर्वपदान्तोदात्तत्वं प्राप्नोतीति दोषः। अत्र समादधात्याचार्य्याः उत्तरपदवृद्धौ इति पदवटकोत्तरपदस्य 'उत्तरपदस्य'[20] इत्यधिकारविहिता वृद्धिर्यस्मिन्निति बहुव्रीहिसमासात् भासशब्दे अतथात्वेन नास्य सूत्रस्य प्रसक्तिरिति दोषपरिहारः कृतः। द्वितीयदोषस्तु - 'तावती भार्य्या यस्य तावद्भार्य्यः', 'यावद्भार्य्यः' इत्यत्र 'वद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे'[21] इत्यनेन सूत्रेण पुंवद्भावप्रतिषेधः प्राप्नोतीति । दोषोऽयं व्यधिकरणवहुव्रीहिसमासेन 'वृद्धेर्निमित्तं यस्मिन् सोऽयं वृद्धिनिमित्तः तस्य वृद्धिनिमित्तस्ये'त्यनेन निवार्य्यते । तथा चातद्भावितपक्षस्य निर्दुष्टत्वं प्रतिपाद्य भाष्यकारेण तद्भावितातद्भावितानामुभयविधानामपि ग्रहणं प्रकृतसूत्रे सिद्धान्तरूपेण स्वीकृतम् ।

**४. पाणिनीयसूत्राणां वैशिष्ट्यम् -**

सञ्ज्ञासूत्रेषु सञ्ज्ञाशब्दानां सम्प्रत्ययार्थं, सञ्ज्ञासञ्ज्ञयोः सन्देहनिवृत्त्यर्थञ्च न्यासान्तरं कर्त्तव्यमिति पूर्वपक्षाक्षेपः । अस्याक्षेपस्य निवृत्तिस्तु भाष्ये एवं कृता - आचार्य्याणां व्यवहारेण जायते यथा लोके पितरौ स्वपुत्रस्य नामकरणं देवदत्त इति कुरुतः, तथा चान्ये तयोः व्यवहारादेव इयमस्य सञ्ज्ञेति जानन्ति । तथा च वेदेऽपि स्फ्यो, यूपः, चषालः इत्यादीनां शक्तिनिर्णयः शक्तिग्राहकशिरोमणेर्व्यवहाराज्ज्ञायते । तथैव प्रकृतेऽपि आचार्य्याः 'सिचि वृद्धिः परस्मैपदम्'[22] इति सूत्रस्थवृद्धिशब्दस्य आकारैकारौकारान् अकार्षीत्, अक्षैपीत्, अश्रौषीत् इत्युदाहरन्ति तेन ज्ञायते 'यया पत्याय्यन्ते सा सञ्ज्ञा', 'ये प्रतीयन्ते ते सञ्ज्ञिन' इति । तस्मात् न्यासान्तरस्यावश्यकता नास्ति । एवं प्रकारेण सञ्ज्ञासञ्ज्ञयोः व्यवहारादेव सन्देहनिवृत्तिपुरस्सरं सम्प्रत्ययो भवति । एवञ्च लोक इव आकृत्यभाविका सञ्ज्ञा, आकृतिमान् सञ्ज्ञीति, वृद्धिशब्दस्य एकत्वात् सञ्ज्ञा आदैचां बहुत्वात् सञ्ज्ञिनः इति सञ्ज्ञाकरणस्य लघ्वर्थत्वाद्बुद्ध्यते । किञ्च लिङ्गकरणेनाऽपि साधयितुं



Scanned with CamScanner

शक्यं, तथाऽपि पाणिनीयत्वं नश्यतीति यथान्यासमेवालम् । तथा च प्रकृते 'सञ्ज्ञाधिकारः सञ्ज्ञासम्प्रत्ययार्थम् इतरथा ह्यसम्प्रत्ययो यथा लोके' इति वार्त्तिकमुत्तरति - न च यथा लोके तथा व्यकरणे । यतो हि 'प्रमाणभूत आचार्य्यो दर्भपवित्रपाणिः शुचावकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म । तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुम्, किं पुनरियता सूत्रेण'[23] ॥ इति । अत्रागतशब्दाः श्रीमत्कैयटेन महाभाष्यस्य प्रसिद्धटीकायां व्याख्याताः - प्रमाणभूतः = प्रकृते प्रमाणशब्दः प्रामाण्ये वर्त्तते तथा च प्रामाण्यं प्राप्त इत्यर्थः । दर्भपवित्रपाणिः इति पदं प्रमादाभावं दर्शयति, अत्र प्रमादो नाम पिशाचादिसम्बन्ध इति उद्योतकृता प्रत्यपादि । प्राङ्मुख इति पदं प्राच्याः अभ्युदयहेतुत्वेनोल्लेखि । महता इति शब्देन मनः प्रणिधानं बुध्यते । अत्र अनर्थकेनेत्यस्य बोध्यार्थरहितेनेत्यर्थः । तथाच प्रामाणिकाचार्य्यः दर्भैः पूतपाणिकः ब्रह्ममुहूर्त्ते प्राच्यां दिशि अभिमुखीभूय महता साधनेन सूत्रान् विरचयति स्म, अतो न शक्योऽबोधकेन एकेनाऽपि पदेन । अत एव यथान्यासमेव सञ्ज्ञासञ्ज्ञ्योरसन्देहे शक्तम् ।

**५. वृद्धिशब्दस्य मङ्गलार्थत्वम् -**

'यच्छब्दयोगः प्राथम्यं स्यादुद्देश्यस्य लक्षणमि'ति अभियुक्त्यनुसारमुद्देश्यस्य पूर्वप्रयोगः न्याय्यः । अत एव सर्वेषु सञ्ज्ञासूत्रेषु प्रायः सञ्ज्ञिपदानन्तरमेव सञ्ज्ञापदं भवति, यथा 'अदेङ् गुणः'[24] इत्यादिषु अदेङिति सञ्ज्ञी, गुणः इति सञ्ज्ञा । किन्तु 'वृद्धिरादैच्' इत्यत्र तु सञ्ज्ञासञ्ज्ञिशब्दयोः व्यत्यासो दृश्यते इति दोषः आपद्यते । दोषनिवारणन्तु भाष्ये एवं विहितम् - ग्रन्थादौ मङ्गलमाचरेदिति परम्परां निर्वहन् प्रकृतसूत्रे वृद्धिशब्दस्य मङ्गलार्थत्वादादौ प्रायुज्यत । शब्देन्दुशेखरे नागेशभट्टस्तु उद्देश्यस्य पूर्वप्रयोगः उचितः किन्तु विधेयस्य पूर्वप्रयोगोऽपि न दोषाय अत एव 'अपृक्त एकाल्प्रत्ययः'[25] इति सूत्रे विधेयस्य अपृक्तपदस्य पूर्वप्रयोगो दृश्यते इति जगाद।

**६. इतरेतराश्रयदोषनिवारणम् -**

भाष्यकारेण प्रकृतसूत्रे इतरेतराश्रयः प्रदर्शितः । तत्स्वरूपन्तु - 'सतामादैचां सञ्ज्ञया भवितव्यम्, सञ्ज्ञया चादैचो भाव्यन्ते' इति । एवञ्च 'इतरेतराश्रयाणि कार्य्याणि न प्रकल्पन्ते' यथा - नौर्नाविबद्धा नेतरत्रणाय भवति । अस्यतरेतराश्रयस्य परिहारस्तु शब्दानां नित्यत्वेन अकारि। किञ्च नित्येषु शब्देषु सतामादैचां वृद्धिसञ्ज्ञा क्रियते, न च सञ्ज्ञया आदैचो जायन्ते ।

**७. समुदितसञ्ज्ञानिराकरणम् -**

'वृद्धिरादैजि'त्यत्र आदैचां समुदितसञ्ज्ञा प्राप्नोति, सूत्रे प्रत्येकमिति पदाभावाच्चेत्तन्न । 'देवदत्तयज्ञदत्तविष्णुमित्राः भोज्यन्तामि'ति दृष्टान्ते प्रत्येकमित्यन्तरेणाऽपि प्रत्येकस्मिन् कार्य्यं जायते तथैव प्रकृतसूत्रेऽपि प्रत्येकशब्दान्तरेणाऽपि आ ए औ इति प्रत्येकं वृद्धिसञ्ज्ञा भवत्येव।



Scanned with CamScanner

८. तपरकरणविचारः -

प्रकृतसूत्रघटक-आदैजित्यत्र 'तः परो यस्मादि'ति बहुव्रीहिसमासः, 'तादपि तपरः' इति पञ्चमीतत्पुरुषसमासश्चेति समासद्वयं वर्त्तते । शाब्दिशास्त्रे 'गुणाः भेदकाः', 'गुणाः अभेदकाः' इति पक्षद्वयमपि दरीदृश्यते । भाष्यकारेण 'अस्थिदधिसक्थ्यक्ष्णामनुदात्तः'[26] इत्यत्र उदात्तग्रहणेन 'गुणाः अभेदकाः'[27] इति पक्षं सिद्धान्तत्वेन समुपस्थाप्य उदात्तादिसमकालिकानां तपरकरणेन ग्रहणाभावादादैचामनण्त्वेन सवर्णग्रहणायोग्यत्वाच्च बहुव्रीहिसमासपक्षे आत् इत्यत्र 'असन्देहार्थं तपरकरणमि'ति भाष्ये स्पष्टीकृतम् । एवञ्च 'तात्परः तपरः' इति पञ्चमीतत्पुरुषसमासे ऐजित्यत्र 'आन्तरतम्यात् त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रादेशाः मा भूदित्यर्थं तपरकरणं' स्वीकृतम् । अत एव खट्वा एलका इत्यत्र द्विमात्रिकाकारस्य द्विमात्रिकैकारस्य च स्थाने द्विमात्रिकैकार एव जायते । एवमेव खट्वोदकम्, खट्वौपगवः इत्यत्राऽपि बोध्यम् ।

९. प्रकृतसूत्रवाक्यार्थः -

तत्र सञ्ज्ञाशास्त्रं नाम आधुनिकशक्तिग्राहकम्, तच्च 'वृद्धिरादैच्' इत्यादि । शाब्दिकमते शब्दार्थयोस्तादात्म्याभ्युपगमेन यस्मिन् शब्दे यस्यार्थस्य तादात्म्यम्, तस्य तदर्थवाचकत्वम् इति व्यवस्थासत्त्वाद् 'वृद्धिरादैजि'ति सूत्रेण वृद्धिशब्दे आदैच्तादात्म्यग्रहद्वारा तस्य आदैज्वाचकता सिद्ध्यति । वृद्ध्यादेरादैच्तादात्म्यव्यवहारस्याधुनिकत्वात् शक्तिराधुनिकी ।

तार्किकमते तु सञ्ज्ञासूत्रेषु वृद्ध्यादिसञ्ज्ञापदं वृद्ध्यादिशब्दवाच्यपरम् । तेनादैच् वृद्धिपद-वाच्य इत्यर्थः । शब्दार्थयोस्तादात्म्यस्य बाधितत्वेन यथाश्रुतार्थपरत्वासम्भवात् । अथवा आदैजादि-पदमेव आदैजादिवाचकपरम् । तथा च वृद्ध्यादिशब्द आदैचां वाचक इत्यर्थः । 'अणुदित्सवर्णस्यचाप्रत्ययस्य'[28], 'येन विधिस्तदन्तस्य'[29]त्युभयत्र तु वाचक इत्यस्याध्याहारो वैयाकरणैरपि कर्त्तव्य एवेति ।

अस्तु । शेखरे भट्टनागेशेन वृद्धिरादैजित्यस्य वाक्यार्थं प्रदर्शयता उच्यते - 'वृद्धिपदा-भिन्ना आदैचः' पदपदार्थयोः तादात्म्यसम्बन्धस्य स्वीकृतत्वादिति । तत्र श्रीराघवेन्द्राचार्याः नागेशोक्तवाक्यार्थमसहमानाः विषमपदविवृतिकृतः ऊचुः - अभेदस्य सम्बन्धत्वाभावः[30] मञ्जूषायां नागेशेन प्रतिपादितस्तथा चात्र अभेदसम्बन्धेनान्वयस्वीकारे वदतो व्याघातः स्यात् । एवञ्च 'आदैचो वृद्धिपदाभिन्ना' इति वाक्यार्थे शक्तिग्राहकत्वानापत्तिरित्यपि दोषः । अत एव प्रकृतसूत्रभाष्ये सञ्ज्ञासञ्ज्ञिभावस्य स्वीकारात्, संसर्गमर्य्यादया वाच्यवाचकभावसम्बन्धे सति 'आदैचो वृद्धिपदवाच्याः', 'आदैज्वाचकं वृद्धिपदमि'ति वाक्यार्थो जायते । 'वृद्धिरादैजि'त्यत्र उद्देश्यविधेययोः समानविभक्तिकत्वेन 'समानविभक्तिकनामार्थयोरभेदेनैवान्वयः' इति व्युत्पत्तेः

विरोधापत्तिस्तु न, 'प्रतीतपदार्थकतदर्थयोरभेदान्वयः', 'अप्रतीतपदार्थकतदर्थयोस्तु वाच्यवाचकभावेनान्वयः' इति व्युत्पत्त्यनुसारं प्रसिद्धपदार्थयोरेवाभेदान्वयो जायते । तत्रैव चिदस्थिमालाकारः श्रीवैद्यनाथपायगुण्डे तु 'आदैचो वृद्धिपदाभिन्ना इत्येव शाब्दबोधः', सञ्ज्ञासञ्ज्ञिभावेनान्वयस्तु फलितार्थ एवेति नागेशमते न दोष इति स्पष्टीचकार ।

वस्तुतस्तु वैयाकरणानां सिद्धान्ते सञ्ज्ञासूत्राणां शक्तिग्राहकत्वं प्रसिद्धम् । तदनुसारं सञ्ज्ञासूत्रार्थबोधे शक्तेः एव बोधनं समुचितम् । शक्तिश्चात्र तन्त्रे तादात्म्यरूपा । तादात्म्यञ्चात्राभेदः। नागेशोक्तेन आदैचो वृद्धिपदाभिन्ना इति वाक्यार्थेन तादात्म्यरूपोऽभेदः प्रदर्शितः, यतश्च 'एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकमि'तिरीत्या सम्बन्धिनोः शब्दार्थयोः ज्ञानं सुशकम् । अपि च समानविभक्तिकयोः नामार्थयोः अभेदान्वयः इति अभियुक्तोक्त्या नागेशोक्तः वाक्यार्थः एव समीचीन इति मे प्रतिभाति ।

**निष्कर्षः -**

शब्दानुशासनस्य आद्यसूत्रे वृद्धिरादैजित्यत्र सञ्ज्ञापदस्याद्योपादानन्तु मङ्गलार्थम् विहितम्। सूत्रेऽस्मिन् कुत्वाभावः 'छन्दोवत्सूत्राणि भवन्ती'ति इष्ट्या 'अयस्मयादीनि छन्दसो'त्यनेन भसञ्ज्ञया सिध्यति । तथा च वृद्धिशब्दः प्रत्येकमादैचां वर्णानां सामान्येन तद्भावितानामतद्भावितानाञ्च सञ्ज्ञात्वेन विधीयते । आचार्य्यव्यवहारेणैव सञ्ज्ञासञ्ज्ञिनोः सन्देहनिवृत्तिः, सञ्ज्ञाधिकारस्य प्रत्ययो भवति तदर्थं पृथङ्न्यासोऽनपेक्षितः। एवञ्च शब्दानां नित्यत्वात् सतामादैचां सञ्ज्ञया भवितव्यम्, सञ्ज्ञया चादैचो भाव्यन्ते इति अन्योन्याश्रयदोषोऽपि न जायते । अस्य वाक्याथस्तु - वृद्धिपदाभिन्नाः आदैचः इत्येव पदपदार्थयोः तादात्म्यसम्बन्धेनान्वयस्य स्वीकारात्, तादात्म्यस्याभेदरूपत्वाच्च ।

**सन्दर्भाः**

1. अष्टाध्याय्याम् 1.1.1 ।
2. परिभाषेन्दुशेखरे 2 ।
3. परिभाषेन्दुशेखरे 3 ।
4. अष्टाध्याय्याम् 8.2.1 ।
5. अष्टाध्याय्याम् 6.1.88 ।
6. अष्टाध्याय्याम् 1.1.49 ।
7. व्याकरणमहाभाष्ये पृ. सं. 121 ।
8. अष्टाध्याय्याम् 1.1.1 ।



Scanned with CamScanner

9. अष्टाध्याय्याम् 8.2.30 ।
10. अष्टाध्याय्याम् 1.4.20 ।
11. व्याकरणमहाभाष्ये पृ. सं. 121 ।
12. अष्टाध्याय्याम् 5.4.106 ।
13. अष्टाध्याय्याम् 6.2.197 ।
14. अष्टाध्याय्याम् 5.4.115 ।
15. अष्टाध्याय्याम् 7.1.39 ।
16. अष्टाध्याय्याम् 4.2.14 ।
17. अष्टाध्याय्याम् 4.3.114 ।
18. अष्टाध्याय्याम् 4.1.15 ।
19. अष्टाध्याय्याम् 6.2.105 ।
20. अष्टाध्याय्याम् 7.3.10 ।
21. अष्टाध्याय्याम् 6.3.39 ।
22. अष्टाध्याय्याम् 7.2.1 ।
23. व्याकरणमहाभाष्ये पृ. सं. 127 ।
24. अष्टाध्याय्याम् 1.1.2 ।
25. अष्टाध्याय्याम् 1.2.41 ।
26. अष्टाध्याय्याम् 7.1.75 ।
27. परिभाषेन्दुशेखरे परि. स. 118 ।
28. अष्टाध्याय्यां 1.1.69 ।
29. अष्टाध्याय्याम् 1.1.72 ।
30. सम्बन्धो हि सम्बन्धिद्वयभिन्नत्वे सति द्विष्ठत्वे च सति आश्रयतया विशिष्टबुद्धिनियामकः परमलघूमञ्जूषायां शक्तिनिरूपणे, पृ. सं. 59 ।

## सहायकग्रन्थसूची

1. पाणिनीयः अष्टाध्यायीसूत्रपाठः - सम्पादकः - श्रीब्रह्मदत्तजिज्ञासुः, राधाप्रेस दिल्ली, प्रकाशनवर्षम् - 2005, सप्तदशं संस्करणम् ।



Scanned with CamScanner

2. परमलघुमञ्जूषा – 'भावप्रकाशिका' 'बालबोधिनी' संस्कृतहिन्दीव्याख्योपेता, व्याख्याकारः सम्पादकश्च – डॉ जयशङ्करलालत्रिपाठी, चौखम्बा कृष्णदास अकादमी, वाराणसी, प्रकाशनवर्षम् – 2011, चतुर्थसंस्करणम् ।
3. परिभाषेन्दुशेखरः – 'सुबोधिनी'-हिन्दीव्याख्योपेतः, व्याख्याकारः – आचार्य्य-विश्वनाथमिश्रः, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, प्रकाशनवर्षम् – 2011, पुनर्मुद्रितसंस्करणम् ।
4. लघुशब्देन्दुशेखरः – षट्टीकापेतः, सम्पादकः – प्रो. बालशास्त्री, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, प्रकाशनवर्षम् – 2013 ।
5. लघुशब्देन्दुशेखरः – हिन्दीदीपिकाटीकाञ्चितः, टीकाप्रणेता – पं. श्रीताराकान्तझाः, कामेश्वरसिंहदरभङ्गासंस्कृत-विश्वविद्यालयः, दरभङ्गा, प्रकाशनवर्षम् – 1985, प्रथमसंस्करणम् ।
6. वैयाकरणसिद्धान्तकौमुदी – बालमनोरमातत्त्वबोधिनीसहिता, मोतीलाल बनारसीदास, दिल्ली, प्रकाशनवर्षम् – 2010, प्रथमसंस्करणम् ।
7. वैयाकरणसिद्धान्तकौमुदी – लक्ष्मीसहिता ।
8. वैयाकरणसिद्धान्तदिग्दर्शनम् – दिग्दर्शकः – प्रो. बोधकुमारझाः, रचनाप्रकाशनम्, जयपुरम्, प्रकाशनवर्षम् – 2006, प्रथमसंस्करणम् ।
9. व्याकरणमहाभाष्यम् – संस्कर्त्ता – श्रीगुरुप्रसादशास्त्री, सम्पादकः – पण्डिकनन्द-किशोरशास्त्री, प्रतिभा प्रकाशनम्, दिल्ली, प्रकाशनवर्षम् – 1999, पुनर्मुद्रणम्।
10. व्याकरणमहाभाष्यम् – 'सप्रदीप' भावबोधिनीहिन्दीव्याख्योपेतम्, व्याख्याकारः – प्रो. जयशङ्करलालत्रिपाठी, चौखम्बा कृष्णदास अकादमी, वाराणसी, वि.सं. 2055, प्रथमसंस्करणम् ।
11. व्याकरणमहाभाष्यम् – अनुवादकः विवरणकारश्च – श्रीचारुदेवशास्त्री, मोतीलाल बनारसीदास, दिल्ली, प्रकाशनवर्षम् – 2011, प्रथमसंस्करणम् ।

**शोधच्छात्रा ( व्याकरणम् )**
**राष्ट्रियसंस्कृतसंस्थानम्**
**क. जे. सोमैया संस्कृतविद्यापीठम्**
**विद्याविहारः, मुम्बई – ७७**

★★★



Scanned with CamScanner

विक्रमाब्दः - 2075 खीस्ताब्दः - 2018 ISSN NO. 2457-0729

तृतीयोऽङ्कः

# वाग्वै ब्रह्म

सन्दर्भिता मूल्याङ्किता च वार्षिकी राष्ट्रियशोधपत्रिका

Peer Reviewed Research Journal

सृष्टौ या सर्गरूपा जगदवनविधौ पालिनी या च रौद्री,
संहारे चापि यस्या जगदिदमखिलं क्रीडनं या पराख्या ।
पश्यन्ती मध्यमाऽथो तदनु भगवती वैखरीवर्णरूपा-
साऽस्मद्वाचं प्रसन्ना विधिहरिगिरिशाराधिताऽलङ्करोतु ॥

व्याकरणविभागः
राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
(मानवसंसाधनविकासमन्त्रालयभारतसर्वकाराधीनम्)
क॰जे॰सोमैयासंस्कृतविद्यापीठम्,
विद्याविहारः, मुम्बई – 77

Scanned with CamScanner

# शोधपत्रानुक्रमणिका


| क्र. सं. | शोधशीर्षकम् | लेखकः | पृष्ठाङ्कः |
|---|---|---|---|
| 1. | भर्तृहरेः वाचां त्रयीत्वं वा, चतुष्टयीत्वं वा । | प्रो. बोधकुमारझाः | 1 |
| 2. | भर्तृहरिमते शब्दवैशिष्ट्यविमर्शः । | प्रो. अशोचन्द्रगौडशास्त्री | 8 |
| 3. | वाक्यपदीयब्रह्मकाण्डस्थविषयविमर्शः । | डॉ. राजधरमिश्रः | 15 |
| 4. | जगतः शब्दविवर्त्तत्वविचारः । | डॉ. देवदत्तः सरोदे | 20 |
| 5. | तुरीयवागुत्पत्तिविमर्शः - वाक्यपदीयसन्दर्भे । | डॉ. प्रियव्रतमिश्रः | 27 |
| 6. | भावविकारसन्दर्भे भावपदार्थः । | डॉ. दीपेशविनोदकतिरा | 33 |
| 7. | वाक्यपदीयस्य ब्रह्मकाण्डे जगतः शब्दपरिणामत्वम् । | डॉ. शरदचन्द्रसाहुः | 39 |
| 8. | Phonetics and Phonology : An Historical View. | Dr. Shweta Sood | 48 |
| 9. | शास्त्रेषु नञर्थविमर्शः । | डॉ. सन्तोषकुमारझाः | 55 |
| 10. | वाक्यपदीये शब्दब्रह्मणः स्वरूपम् । | श्रीसत्यराजरेग्मी | 60 |
| 11. | ‘इष्यते पुत्रः’ इत्यत्र क्यजभावस्य रहस्यम् । | ब्र. अजयः | 70 |
| 12. | उदात्तादि स्वरों का स्वरूप विवेचन । | आचार्य उदयन मीमांसक | 74 |
| 13. | भर्तृहरिदृशा अपभ्रंशशब्दविमर्शः । | सुश्रीविदुषीबोल्ला | 93 |
| 14. | वाक्यपदीयस्फोटविमर्शः । | डॉ. सुभाषचन्द्रमीणा | 99 |
| 15. | आगमप्रामाण्यविचारः । | डॉ. नवीनकुमारमिश्रः | 105 |
| 16. | शब्दार्थसम्बन्धनिरूपणम् । | डॉ. माधवदत्तपाण्डेयः | 111 |
| 17. | वाक्यपदीय-ब्रह्मकाण्ड में उपमा एवं उदाहरण का अन्वेषण । | डॉ. (श्रीमती)गीता दुबे | 119 |
| 18. | वाक्यपदीयब्रह्मकाण्डस्थविषयविमर्शः । | सौ. मैत्रेयी सुयोगपटवर्धन | 126 |
| 19. | वाक्यपदीये शब्दतत्त्वम् | श्रीरूपेशताटे | 132 |


Scanned with CamScanner

# भर्तृहरिदृशा अपभ्रंशशब्दविमर्शः

✍ सुश्रीविदुषीबोल्ला

( भर्तृहरेर्वाक्यपदीयं समेषां सम्बद्धानां शास्त्राणां पक्षं स्थिरीकृत्य पुनश्च तत्खण्डनपुरस्सरं महाभाष्यसम्मतं सिद्धान्तं समुपस्थापयति । ग्रन्थस्यास्य ब्रह्मकाण्डे अपभ्रंशानामर्थात् व्याकरणसंस्कारहीनानां शब्दानां वाचकत्वं न वेति बहु विचारितम् । यदि च वाचकत्वं तर्हि कीदृशम् ? तत्र तार्किकाः अपभ्रंशानां वाचकत्वं न स्वीकुर्वन्ति । तन्मते अपभ्रंशं श्रुत्वा साधुशब्द-स्मरणादर्थबोधः । परं ये न साधून् जानन्ति तेषां शक्तिभ्रमाद् बोध इति तेषामाकूतम् । परमेतन्न विचारसहम्, व्यवहारे साधुरिव असाधोरपि साक्षा-दर्थबोधकत्वस्यानुभवात् । अनुभवस्य चापलापानर्हत्वात् । तदुक्तं पत-ञ्जलिना - 'समानायामर्थावगतौ शब्दैश्चापशब्दैश्च'त्यादि । एतन्मूलकमेव हरिराह - 'वाचकत्वाविशेषेऽपि नियमः पण्यपापयोः'इति । अत्रेदमवधेयम् - शक्तत्वं यत्र भवति तत्रैव साधुत्वमिति नैयायिका आशेरते, किन्तु शाब्दिकाः शक्तत्वं साधुत्वं च पृथक् पृथक् स्वीकुर्वते । अपभ्रंशानां वाचकत्वेऽपि तेषां साधुत्वं न भवतीति भर्तृहरिहृदयम् । तथाहि - शब्दप्रयोगस्य प्रयोजनद्वयम् - अर्थबोधः, पुण्यञ्च । तत्रापभ्रंशेन प्रथमस्यैव प्रयोजनस्य सिद्धिः, साधुशब्देन च द्वयस्यैवेति परमार्थः । प्रकृतनिबन्धे अनुसन्धात्र्या क्रमेण प्रमाणपुरस्सरं सर्वानेतान् विषयान् प्रख्यापयति । -स. )

संसारेऽस्मिन् यावन्तो वर्त्तमाना व्यवहारास्ते समेऽपि शब्दानुपातिन एवेति प्रत्यक्षानु-भवाच्छब्दस्य सकलकार्य्योपादानत्वं सिद्ध्यति । तदेव हरिणाऽप्युक्तम् -

**न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।**
**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥ इति ॥**

अपि च, 'वागेव विश्वा भुवनानि जज्ञे' इति मन्त्रेणाऽपि शब्दमाहात्म्यमवगम्यत एव । शब्दाः अर्थप्रत्यायकाः भवन्ति । देशविशेषसम्बद्धशब्दसमूह एव तद्देशविशेषभाषारूपेण प्रसिद्ध्यते । इयं भाषा द्विविधा - शिष्टानामशिष्टानाञ्च । तत्र शिष्टैः साधुशब्दाः प्रयुज्यन्ते, अशिष्टैश्च अपभ्रंशशब्दाः । तत्र अपभ्रंशशब्दाः शक्ताः उत अशक्ताः इति विशदी चर्चा शास्त्रेषु दरीदृश्यते । विषयेऽस्मिन् विव्रियमाणाः बिन्दवः सन्ति -

1. किं नाम साधुत्वम् ?
2. अपभ्रंशत्वं किम् ?



Scanned with CamScanner

3. साध्वसाधुत्वयोर्भैन्यम्
4. अपभ्रंशानां बोधकत्वे मतत्रयम्
5. तत्र तार्किकमतम्
6. भूषणकृन्मतम्
7. मञ्जूषाकृन्मतम्
8. वाक्यपदीयकृन्मतम्
9. निष्कर्षः

1. **किं नाम साधुत्वम्** – 'शास्त्रपूर्वके प्रयोगे धर्म्मः', 'एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुग्भवती' त्यभियुक्तोक्तेः साधुत्वञ्चात्र व्याकरणान्वाख्येयत्वं पुण्यजनकतावच्छेदकत्वम् । साधुत्वज्ञानं व्याकरणागमाद् भवति, उक्तञ्च – 'साधुत्व-ज्ञानविषया सैषा व्याकरणस्मृति' रिति ।

2. **अपभ्रंशत्वं किम्?** – अपभ्रंशत्वञ्च संस्कारहीनशब्दत्वम् । हरिणाऽप्युक्तम् –

**शब्दः संस्कारहीनो यो गौरिति प्रयुयुक्षिते ।**
**तमपभ्रंशमिच्छन्ति विशिष्टार्थनिवेशिनम् ॥**

अस्यैव शब्दान्तरं वर्त्तते असाधुत्वमिति ।

3. **साध्वसाधुत्वयोर्भैन्यम्** – अर्थबोधकत्वन्तु साधुष्विव असाधुष्वपि तिष्ठति । किन्तु धर्म्मजनकत्वं केवलं साधुपु शब्देष्वेव वर्त्तते । यथा तुल्येऽपि रूपत्वे नीलं चक्षुषोऽनुग्राहकं भास्वरं तूपघातकम्, तुल्येऽपि रसत्वे मधुरः श्लेष्माणं जनयति, कटुकः पित्तम्, केषाञ्चिच्छब्दानां विषापहरणादौ सामर्थ्यमन्येषामसामर्थ्यम्, तथैव साधुशब्दानां धर्म्मजनकत्वम्, असाधूनाञ्च धर्म्मजनकत्वाभाववत्त्वम् । उक्तञ्च हरिकारिकायाम् –

**असाधुरनुमानेन वाचकः कैश्चिदिष्यते ।**
**वाचकत्वाविशेषेऽपि नियमः पुण्यपापयोः ॥**

4. **अपभ्रंशानां बोधकत्वे मतत्रयम्** –

(क) अपभ्रंशशब्देन साधुस्मरणं तत एव बोधः इति तार्किकाः ।
(ख) अपशब्दः शब्देन तादात्म्यापन्नोऽर्थम्बोधयतीति द्वितीयम् ।
(ग) अपशब्दः शब्दवत् साक्षादेवार्थं बोधयतीति शाब्दिकाः ।

तदेव वाक्यपदीयकारिकायामपि दृश्यते –

**असाधुरनुमानेन वाचकः कैश्चिदिष्यते ।**
**वाचकत्वाविशेषेऽपि नियमः पुण्यपापयोः ॥**
**ते साधुष्वनुमानेन प्रत्ययोत्पत्तिहेतवः ।**
**तादात्म्यमुपगम्येव शब्दार्थस्य प्रकाशकाः ॥ इति॥**



Scanned with CamScanner

5. **तत्र तार्किकमतम्** – नैयायिकाः ब्रुवते – अपभ्रंशो न वाचकः । द्विविधो हि जनः, व्युत्पन्नः, अव्युत्पन्नश्च । अपभ्रंशशब्दं श्रुत्वा साधुशब्दस्मरणेन परम्परया व्युत्पन्नानां बोधः, न तु अपभ्रंशात् साक्षात् बोधो जायते । अपि च, ये अव्युत्पन्नाः सन्ति, ते असाधुः = अपभ्रंशः शक्तः इति शक्तिभ्रमात् अपभ्रंशेनैव शाब्दबोधं लभन्ते । तदेवोक्तं शाबरभाष्ये – 'गौरिति प्रयोक्तव्ये केनचिदशक्त्या प्रमादेन वा गावीति प्रयुक्तम् । ततः श्रोतुः गौरितिप्रयोक्तव्ये गावीत्यनेन प्रयुक्तमिति गोपदस्मृत्या गोविषयको बोधो जातः, ततः पार्श्वस्थेन गावीशब्दादेवास्य बोधो जात इति भ्रान्त्या प्रतिपन्नमिति तेन गावीशब्दस्य गोरूपऽर्थे तादात्म्याभावेऽपि तादात्म्यमुपगम्य गावीशब्दादेव साक्षाद्बोधो भवती'ति । स्पष्टञ्चेदं 'तदशक्तिश्चानुरूपत्वात्' इति सूत्रे शाबरभाष्ये । भर्तृहरिणाऽपि स्वकारिकायां प्रदर्शितम् –

**ते साधुष्वनुमानेन प्रत्ययोत्पत्तिहेतवः ।**
**तादात्म्यमुपगम्येव शब्दार्थस्य प्रकाशकाः ॥**
**न शिष्टैरनुगम्यन्ते पर्य्याया इव साधवः ।**
**न यतः स्मृतिशास्त्रेण तस्मात् साक्षादवाचकाः ॥**

वाक्यपदीये अपभ्रंशानां साधुस्मरणद्वारेण बोधकत्वे, एतेषां साक्षात् वाचकत्वाभावे च दृष्टान्तः प्रदर्श्यते – यथा दन्तादिकरणानामपूर्णसामर्थ्याद् बालेन प्रयुक्तेऽपभ्रंशे सति तत्प्रकृतिकसाधुशब्दज्ञैः श्रोतृभिः तच्छब्दम् अनुमीय तदर्थं ज्ञायते । साधुशब्द-एवार्थबोधकमिति निश्चिन्वन्ति, न तु बालोच्चारितापभ्रंशशब्दः । अत्र कारिका स्तु –

**अम्बाम्बेति यदा बालः शिक्ष्यमाणोऽपभाषते ।**
**अव्यक्तन्तद्विदां तेन व्यक्ते भवति निश्चयः ॥**
**एवं साधौ प्रयोक्तव्ये योऽपशब्दः प्रयुज्यते ।**
**तेन साधुव्यवहितः कश्चिदर्थोऽभिधीयते ॥**

6. **भूषणकृन्मतम्** – अपभ्रंशादपि लोके बोधदर्शनात् बोधकजनकत्वरूपशक्तिस्तत्राऽपि वर्त्तते। शक्तत्वस्येव साधुतायाः व्याकरणाधिकरणे शास्त्रदीपिकेति ग्रन्थे प्रतिपादनात्, शक्तत्वे साधुताऽपि भवेदेव इत्याशङ्कां द्विधा समाधत्ते – अपभ्रंशानां साक्षाद्बोध-जनकत्वरूपशक्त्य – नभ्युपगमेन, वाचकत्वस्य सत्त्वेऽपि साधुत्वस्याऽन्यथानिर्वचनेन चेति प्रकारद्वयेनेति तत्त्वम् ।

अपभ्रंशानामशक्तत्वे ततो बोध एव न स्यात् । न च साधुस्मरणादेव अपभ्रंशेभ्यो बोधो भवतीति विभावनीयम् । तानजानतां पामराणामपि लोके बोधदर्शनात्, एतेषां साधोरबोधाच्च । न च अपभ्रंशेषु शक्तिभ्रमाद् बोधो भवतीति वक्तव्यम्, बोधकत्वाभावरूपबाधज्ञानाऽसम्भवेन अर्थात् तदभाववत्ताज्ञानम्प्रति तद्वत्तानिश्चयस्य प्रतिबन्धकत्वात् तद्ग्रहस्याभ्रमत्वाच्च । अर्थात् किमपि ज्ञानं तावद् भ्रमः न कथ्यते, यावत् तस्य ज्ञानस्य कश्चित् बाधकः न भवेत् । यथा कस्यचित् असाधुः शब्दः शक्तः



Scanned with CamScanner

इति शक्तिज्ञानम् अस्ति, परन्तु पश्चात् असाधुः शब्दः न शक्तः इति पूर्वज्ञानस्य बाधकं ज्ञानं जायते, तदा पूर्वज्ञानं भ्रमः कथ्येत । अर्थात् सन्देहरहितज्ञानं बाधकज्ञानं विना भ्रमो भवितुं नार्हति । तथा च अज्ञानिनां जनानां तु बाधकज्ञानं भवति नहि, तर्हि तेषां शक्तिभ्रमात् शाब्दबोधो भवतीति न सम्यक् । अत एव स्त्रीशूद्रबालकादिद्वारा अन्यथा उच्चारिते साधुशब्दे यदा अर्थसन्देहो भवति, तदा तेषाम् उच्चारितेन अपभ्रंशशब्देन एव लोके अर्थनिर्णयः क्रियते ।

7. **मञ्जूषाकृन्मतम्** – नैयायिकाः व्याकरणनिष्पाद्यत्वं साधुत्वम्, शक्तत्वम् एव साधुत्वमिति स्वीकुर्वन्ति । वैयाकरणमते तु साधुत्वं शक्तत्वञ्च भिन्नमेव । तथा च शक्तत्वम् अपभ्रंशेऽपि भवति, किन्तु अपभ्रंशाः साधुत्वाभाववन्तः भवन्ति ।

नागेशमते वाच्यवाचकभावरूपा शक्तिः यथा साधुशब्देषु तिष्ठति, तथा अपभ्रंशेषु अन्यथोच्चारितेषु असाधुशब्देष्वऽपि तिष्ठति । तथा च नानाशक्तिग्राहकेषु व्याकरणोपमानकोशादिषु शिरोमणिः श्रेष्ठस्य व्यवहारः साधूनाम् असाधूनाञ्च समानरूपेण शक्तिं ग्राहयति । पदपदार्थम् अजानतां बालानां जडपशूनाञ्च प्रवृत्तिं दृष्ट्वा पूर्वजन्मनः ज्ञातायाः शक्तेः स्मरणं भवतीति कल्प्यते । तेन च तेषां शाब्दबोधः । जडपश्वादीनाञ्चाऽपि स्वजात्यनुसारं सुनिश्चिता काचित् प्रतिभा भवति, अतः तेषामपि अनादिवासनया एव स्तन्यपाने जलतरणादौ प्रवृत्तिः । एवञ्च बाल्यकाले, पशूनां प्राथमिकप्रवृत्तौ च शक्तिग्रहस्य असम्भवात् जन्मान्तरीयशक्तिग्रहः कारणत्वेन बुद्ध्यते । अपभ्रंशशब्दाः शक्ताः इत्यत्र मञ्जूषायां त्रीणि प्रमाणानि प्रदर्शितानि –

क. भाष्यकारवचनमेव प्रमाणम् – समानायामर्थावगता शब्दैश्चापशब्दैश्च शास्त्रेण धर्मनियमः।

ख. भर्तृहरेः प्रमाणम् – वाचकत्वाऽविशेषेऽपि नियमः पुण्यपापयोः इति ।

ग. मीमांसकानामार्य्यम्लेच्छाधिकरणमपि प्रमाणम् –

आर्य्यम्लेच्छाधिकरणे म्लेच्छप्रचलितार्थज्ञानस्य अपेक्षया आर्य्यप्रसिद्धेः – आर्य्यप्रचलि- तार्थज्ञानस्य वैदिकवाक्यात् जायमान शाब्दबोधे बलवत्त्वं प्रतिपादयन्ति । अयमाशयः – द्वौ यदि कार्य्यसाधकौ स्तः, तर्हि अनयोः कतरः बलवान् कार्य्यसाधकः इति विचारः क्रियते । यदि एकः कार्य्यस्य साधकः, एकश्च कार्य्यस्य असाधकः भवेत्, तर्हि साधकस्य बलवत्त्वं स्वतः सिद्धं भवति । तदर्थं विचारस्य आवश्यकता न जायते ।

8. **वाक्यपदीयकृन्मतम्** – एकतरपक्षपातियुक्तिरूपविनिगमनाविरहाच्छक्तिः साधुशब्देष्विव अपभ्रंशेष्वपि तिष्ठति । शब्दानां साधुत्वासाधुत्वव्यवस्थायाः निमित्तं न केवलं शब्द-स्वरूपमेव प्रत्युत प्रवृत्तिनिमित्तभेदप्रयुक्तार्थभेदः । तथा च व्याकरणप्रक्रियया व्युत्पादि-तोऽपि 'अस्व'शब्दः एकशफत्वरूपाश्वत्वप्रवृत्तिनिमित्तविशिष्टेऽर्थे प्रयुक्तोऽसाधुः, किन्तु स एव स्वभिन्ने धनाभावे निर्धने वा स्वशक्यार्थे प्रयुक्तः साधुर्भवति, एवं 'गोणी'शब्दः सास्नादिमत्त्वरूपगोत्वप्रवृत्तिनिमित्तविशिष्टे स्वशक्यार्थे 'गवि' अर्थे प्रयुक्तोऽसाधुर्भवति,



Scanned with CamScanner

परन्तु गोदोहनपात्रत्वरूपावपनत्वविशिष्टे स्वार्थे प्रयुक्तः साधुर्भवति । तदेवोक्तं भर्त्तृहरिणा –

**अस्वगोण्यादयः शब्दाः साधवो विषयान्तरे ।**
**निमित्तभेदात् सर्वत्र साधुत्वन्तु व्यवस्थितम् ॥**

करणपटुत्वोच्चारणसामर्थ्यादिगुणरहितसंस्कृतज्ञानरहितवक्तॄणां कृते अनादिपूर्वपूर्व-प्रयोगमूलकोत्तरोत्तरप्रयोगप्रवाहात् प्रसिद्धिं लब्धाः अपभ्रंशशब्दाः मातृभाषारूपेण रूढित्वमापन्नाः साक्षाद् वाचकाः भवन्ति । तेषां कृते अपभ्रंशशब्दानां मूलसंस्कृतशब्दाः अज्ञातशक्तिकत्ववन्तः स्मृतेरविषयः सन्तः अर्थबोधकाभाववन्तो भवन्ति । तदेवोक्तं वाक्यपदीये – **पारम्पर्य्यादपभ्रंशा निर्गुणेष्वभिधातृषु ।**
**प्रसिद्धिमागता ये तु तेषां साधुरवाचकः ॥**

अपभ्रंशेष्वपि शक्तिस्वीकारे नानात्वापत्तिस्तु न स्यात् । संस्कृतवत् सर्वभाषायाः सर्वत्रैकत्वेन प्रत्येकं विनिगमनाविरहतादवस्थ्यात् । किञ्चानुपूर्वी वाचकतावच्छेदिका । सा च पर्य्यायेष्विव अपभ्रंशेष्वपि अन्यान्यैवेति कस्तयोर्विशेष इति विभाव्यं सूरिभिः । तथा च संस्कृतवद् अपभ्रंशस्य सर्वत्रैकत्वेन प्रत्येकं शब्दा शक्ता एव । न च पर्य्यायतया अपभ्रंशानां गणनापत्तिः, साधूनामेव कोशादौ विभागाभिधानात् ।

9. **निष्कर्षः** – अत्राऽनित्यवादिनां मतं यत् अपभ्रंशा एव साधूनां प्रकृतयः, साधवस्तु संस्काराज्जाताः संस्कृताः । इत्थञ्चापभ्रंशा एव वाचका इति तत् प्रकरणविरुद्धमेव । शक्तत्वं साधुत्वमिति स्वीकुर्वतां तार्किकाणां मतमप्यसमीचीनम्, उभयोः पृथग्विषयत्वात्। साध्वसाध्वोः प्रकृतिविकृतिभावाग्रहं विहाय साधूनामसाधूनाञ्च तुल्यं वाचकत्वमिति भर्त्तृहरीणां प्रमाणभूताचार्य्याणां हृदयम् । किन्त्वत्र पुण्यजनकत्वन्तु साधूनामेव 'वाचकत्वाविशेषेऽपि नियमः पुण्यपापयोः' इति कारिकया स्फष्टीक्रियते मुनिपुङ्गवेन हरिणा ॥

**सहायकग्रन्थसूची**


1. वाक्यपदीयम् (ब्रह्मकाण्डम्), सम्पादकः – सूर्यनारायणशुक्लः, रामगोविन्दशुक्लः, चौखम्भासंस्कृतसंस्थानम्, वाराणसी, प्रथमसंस्करणम्, 2006 ।
2. वाक्यपदीयम् (ब्रह्मकाण्डम्), सम्पादकः, व्याख्याकारश्च – आचार्य्यवेदान्तझाः, मन्दाकिनीसंस्कृतविद्वत्परिषद्, दहली, प्रथमसंस्करणम्, 2002 ।
3. व्याकरणमहाभाष्यम्, सम्पादकः – श्रीगुरुप्रसादशास्त्री, प्रतिभाप्रकाशनम्, देहली, प्रथम-संस्करणम्, 1938 ।
4. पाणिनीयः अष्टाध्यायीसूत्रपाठः, सम्पादकः – श्री प. ब्रह्मदत्तजिज्ञासु, राधाप्रेस, देहली, सप्तदशं संस्करणम्, 2005 ।




Scanned with CamScanner

5. परमलघुमञ्जूषा, सम्पादको व्याख्याकारश्च - प्रो. बोधकुमारझा:, हंसाप्रकाशनम्, जयपुर, संस्करणम्, 2018 ।
6. लघुशब्देन्दुशेखरः, सम्पादकः - प्रो. बालशास्त्री, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी, संस्करणम्, 2013 ।
7. समासस्तदव्ययीभावश्च, प्रो. बोधकुमारझा:, विद्यानिधिप्रकाशनम्, देहली, प्रथमसंस्करणम्, 2011 ।
8. प्रौढनिबन्धसौरभम्, आचार्यविश्वनाथमिश्रः, राष्ट्रियसंस्कृतसाहित्यकेन्द्रम्, जयपुर, प्रथमसंस्करणम्, 2003 ।
9. तत्त्वबोधिनीसमाख्यव्याख्यासंवलितासिद्धान्तकौमुदी, चौखम्बासंस्कृतप्रतिष्ठानम्, देहली, संस्करणम्, 2010 ।
10. वैयाकरणभूषणसारः प्रभादर्पणव्याख्याद्वयोपेतः, सम्पादकः - श्रीबालकृष्णपञ्चोली, चौखम्बा-संस्कृतसंस्थानम्, संस्करणम्, वि.सं. 2068, ई. 2012 ।
11. परमलघुमञ्जूषा, भावप्रकाशिका, बालबोधिनी संस्कृतहिन्दीव्याख्योपेता, व्याख्योपेता, व्यख्याकारः सम्पादकश्च - डा. जयशङ्करलालत्रिपाठी, चौखम्बाकृष्णदासअकादमी, वाराणसी, चतुर्थसंस्करणम्, 2011 ।
12. संस्कृतभाषाविज्ञानम्, अनुसन्धाता - चक्रवर्ती श्रीरामाधीनचतुर्वेदी, चौखम्बाविद्याभवनम्, वाराणसी, प्रथमसंस्करणम्, 2005 ।

**गवेषिका**
**राष्ट्रियसंस्कृतसंस्थानम्,**
**क.जे.सोमैयासंस्कृतविद्यापीठम्,**
**मुम्बई - ४०००७७**

★★★



Scanned with CamScanner

UGC Approved Journal No. 40920

ISSN 2277-6443

सप्तमोऽङ्कः, 2018-19

विश्वविद्यालयानुदानायोगद्वारा स्वीकृतशोधपत्रिकासूच्यन्तर्गता

# विद्यारश्मिः

समीक्षिता मूल्याङ्किता च वार्षिकी राष्ट्रियशोधपत्रिका

A Peer Reviewed Refereed Annual National Research Journal

वेदर्चामर्चयन्तस्स्मृतिचयवचनं तत्त्वतश्चर्चयन्तः,
शास्त्रान्तःसंस्पृशन्तोऽमृतगतिमतिदं दर्शनं दर्शयन्तः ।
साहित्यं स्वादयन्तस्सहृदयवसतौ भासमुद्भासयन्तो
विद्याया रश्मयो ज्ञान् पिपुरतु सुधियां शेमुषीमेधयन्तः ॥

**प्रधानसम्पादकः**

प्रो. सुदेशकुमारशर्म्मा

**सम्पादकः, संयोजकश्च**

प्रो. बोधकुमारझाः

**राष्ट्रियसंस्कृतसंस्थानम्**

(मानितविश्वविद्यालयः)

क.जे. सोमैयासंस्कृतविद्यापीठम्

विद्याविहारः, मुम्बई - 77

Scanned with CamScanner

| क्र. सं. | शोधशीर्षकम् | लेखकः | पृष्ठाङ्कः |
|---|---|---|---|
| 21 | वर्त्तमान परिदृश्य में भारत-नेपाल सम्बन्ध | डॉ. रञ्जय कुमार सिंह | 149 |
| 22 | प्रातिपदिकार्थविचारः | डॉ. नवीनकुमारमिश्रः | 155 |
| 23 | अनुसन्धानस्यार्थविमर्शः | डॉ. विनोदकुमारशर्मा | 163 |
| 24 | शिक्षासामाजिकपरिवर्त्तनञ्च | डॉ. मनीषकुमारचाँडकः | 168 |
| 25 | समावेशिशिक्षायाः समस्याः सम्भावनाश्च | डॉ. सचिनकुमारः | 173 |
| 26 | द्व्यर्थो धातुः | ब्र. अजयः | 180 |
| 27 | कारकत्वं प्रातिपदिकार्थत्वञ्च | डॉ. माधवदत्तपाण्डेयः | 187 |
| 28 | Terrorism in South Asia | Dr. Suman Singh | 191 |
| 29 | धर्मशास्त्रोक्तदृशा अशौचनियमाः | डॉ. जितेन्द्रकुमाररायगुरुः | 197 |
| 30 | 'अक्षरवैदर्भी' या नियतकालिकाचे वाङ्मयीन योगदान | डॉ. मिनाक्षी बर्‍हाटे | 201 |
| 31 | वास्तुशास्त्रदृष्ट्या गृहदोषनिरूपणम् | डॉ. अनिरुद्धनारायणशुक्लः | 204 |
| 32 | शारीरिक स्वास्थ्य एवं योग, एक अध्ययन | डॉ. शंकर बाबुराव आंधळे | 210 |
| 33 | तार्किकमतनिरसनपूर्वकः स्फोटविमर्शः | सुश्रीविदुषीबोल्ला | 216 |
| 34 | Polymorphism and Overloading | Miss Vaishali Nivdunge | 226 |
| 35 | शतरुद्रियस्य वैषयिकाधाराः | श्री. सत्यराजरेग्मी | 231 |
| 36 | Contemporary Scenario of Sanskrit Education in Schools & its New Diamensions | Namrata Patel | 238 |
| 37 | शास्त्रपठनदोषाणां निवारणे कूटचित्राणामनुप्रयोगः | अमृता कौर | 244 |


Scanned with CamScanner

# तार्किकमतनिरसनपूर्वकः स्फोटविमर्शः

✍ सुश्रीविदुषीबोल्ला

(शब्दे श्रोत्रेन्द्रियेण गृहीते सति जायते अर्थबोध इति सामान्यतया सम्मन्यते । परं कः शब्दः, कीदृशः शब्दः, कुतो वा तस्य अर्थवाचकत्वम्, स च शब्दः कतिविधः, केन शब्देन कस्यार्थस्य बोधः, कुतो वा बोधः, ध्वनिः कः, कतिप्रकारश्च स इत्यादिविषये शास्त्रेषु भूयान् विचारः कृतः । गवेषिकात्र तत्र-तत्र विमृश्य विशेषतो न्यायमतमुपपाद्य शाब्दिकदिशा तन्निरस्य शाब्दिकसम्मतं मतं प्रस्तौति । तथाहि नैयायिका वर्णसमूहात्मकं पदमर्थवाचकमिति प्रतिपादयन्ति । किन्तु वैयाकरणमते तादृशस्य पदस्य प्रत्यक्षत्वासम्भवात् स्फोटात्मकः शब्द एवार्थवाचक इति दृढं निरूप्यते । तदनुसारम् स्फोटविषयका विचाराः क्रमेणात्र निरूपिताः ॥ - स.)

तावद् कोऽर्थवाचक इति जिज्ञासायां सत्यां वर्णः, वर्णसमूहः, ध्वनिः, स्फोटो वेति विचाराः शास्त्रेषु सन्ति । वृत्त्याश्रय अर्थवाचको भवति । अर्थनिरूपिता वृत्तिर्यत्र तिष्ठति, स एव वृत्त्याश्रयः उच्यते । वृत्तेः निरूपकः अर्थः, वृत्तेराश्रयः शब्दः । शाब्दिकमते शक्तिः व्यञ्जना चेति वृत्तिद्वयम् । वृत्त्याश्रयविषये बहूनि मतमतान्तराणि सन्ति । यथा ध्वनिरेव शब्दः, स च अनित्यः इति नैयायिक-वैशेषिकाः आचक्षते । ध्वनिव्यङ्ग्यं वर्णात्मकं नित्यं शब्दमाहुः मीमांसकाः । वैयाकरणाः पदे वर्णानामिव वाक्ये पदानां कल्पितत्वात् तेषामर्थवत्त्वमपि काल्पनिकमिति वाक्यस्यैव शब्दत्वं सङ्गिरन्ते ।

**तत्र तार्किकमतम् -**

तार्किकाः वृत्त्याश्रयः शब्दः पदमेव, स चाऽनित्यमिति मन्यन्ते । वर्णानां समूहः पदं, पदमेव वृत्त्याश्रयो भवति । किन्तु वर्णस्य क्षणिकत्वात् वर्णसमूहस्य प्रत्यक्षत्वाऽसम्भवात् कथमर्थवाचको भवतीत्यत्र उपायत्रयं तार्किकैः प्रदर्शितम् ।

**तत्र प्रथमः उपायः -**

पूर्ववर्णस्य विनष्टत्वेऽपि तस्य संस्कारवशात् अव्यवहितोत्तरत्वसम्बन्धेन पूर्ववर्णयुक्तचरम-वर्णस्य प्रत्यक्षता भवति । एवञ्च 'घट' इत्यत्र घकार-अकार-टकार-अकाराश्चत्वारो वर्णाः, तत्राऽ-व्यवहितोत्तरत्वसम्बन्धेन घकारेण अकारः सम्बद्धः, घकारसम्बद्ध-अकारेण टकारः सम्बद्धः, घकार-सम्बद्ध-अकारसम्बद्ध-टकारेण सम्बद्धः अकारो वर्त्तते । तथाहि अन्तिमस्याऽकारस्य प्रत्यक्षकाले परस्परसम्बद्धत्वात् चतुर्णामपि वर्णानां प्रत्यक्षत्वे घटपदस्य प्रत्यक्षत्वं जायते । अस्मिन् उपाये घट



Scanned with CamScanner

इत्यत्र पूर्वेषां त्रयाणां संस्कारवशात् स्मरणम् अन्तिमस्य च श्रवणं भवति । अनेनोपायेन पौर्वापर्य्य-व्यवहारः सुलभस्तेन च 'इको यणचि' इत्यनेन यणादिकार्य्यं सम्भवति ।

**द्वितीयः उपायः -**

शब्दजशब्दन्यायेन पदं प्रत्यक्षं भवति । शब्दात् जातः शब्दः शब्दजशब्दः, तस्य न्यायः= रीतिः शब्दजशब्दन्यायः इति कथ्यते । अनेन शब्देन वक्ता यं शब्दमुच्चारयति, स एव शब्दः श्रोतुः श्रवणेन्द्रियेण गृह्यते ।

**तृतीयः उपायः -**

पूर्वपूर्ववर्णानां श्रवणानुभवात् उत्पन्नसंस्कारेण सहितः योऽन्तिमवर्णश्रवणानुभवस्तेन पूर्वपूर्ववर्ण-संस्कारसहिताऽऽन्तिमवर्णानुभवेन सकलपूर्ववर्णविषयकक्रमिकस्मरणेन घटादिपदात् शाब्दबोधो भवति ।

**तार्किकखण्डनम् -**

तार्किकाः वृत्त्याश्रयः शब्दः पदमेव, स चाऽनित्यमिति मन्यन्ते । वर्णसमुदायरूपं पदमनित्य-मर्थात् उत्पत्तिविनाशयुक्तं विद्यते । यद् वस्तु उत्पत्तिविनाशवद्, तदन्यस्माद् भिद्यते, यथा मनुष्येषु गवादिषु च । परन्तु भाष्ये[1] एकः इन्द्रशब्दः शतसङ्ख्यकेषु यज्ञेषु प्रादुर्भूतो युगपत् सर्वयागेषूपस्थित्या उपकारकं भवतीत्युक्तम् । अत्र 'एकः इन्द्रशब्दः क्रतुशते.'[2] इति भाष्ये पदस्याऽनित्यत्वे परस्परञ्च पदानामनेकत्वे 'एकः' इति प्रयोगेन विरोधः स्पष्टः। एवञ्च पदानां प्रत्यक्षत्वाय अव्यवहितोत्तर-त्वसम्बन्धेन, शब्दजशब्दन्यायेन, चरमवर्णपर्य्यन्तसंस्कारद्वारा समेषां वर्णानां स्मरणात्मकं प्रत्यक्षमित्यु-पायत्रयं प्रदर्शितम्, मञ्जूषाकृता स्वग्रन्थे ते उपायाः खण्डिताः।

**प्रथमोपायखण्डनम् -**

अव्यवहितोत्तरत्वसम्बन्धेन द्वौ विद्यमानौ एव सम्बद्धौ शक्नुतः । घटादिपदे पूर्ववर्णः उत्तर-वर्णप्रत्यक्षकाले नष्टः, उत्तरवर्ण एव तदा विद्यमानः, तयोः नष्टविद्यमानवर्णौ न सम्बद्धौ । तेन च अचोऽव्यवहितपूर्ववर्णोऽयम्, इकोऽव्यवहितोत्तरवर्णोऽयमिति सुधी+उपास्यः इत्यादौ शाब्दिकद्वारा सि-द्धिवेलायां प्रत्यक्षव्यवहारोऽसम्भवः स्यात् । तथा च प्रथमे पक्षे नष्टविद्यमानयोः पौर्वापर्य्यं वक्तु-मशक्यमिति दोषः। तथा च पूर्वत्वविशिष्टोत्तरवर्णरूपपदस्याऽभावात् वृत्त्याश्रयत्वाभावो दोषः।

**द्वितीयोपायखण्डनम् -**

शब्दजशब्दन्याय्येन पदप्रत्यक्षत्वस्य साधनेऽपि पदस्य विद्यमानतायाः अभावः स्यात् । तस्य प्रत्यक्षस्य भ्रमत्वात् भ्रमात्मकज्ञाने वस्तुनः (पदस्य) सत्ता न सिध्यति, यथा शुक्तौ रजतभ्रमेऽपि रजतस्य विद्यमानता न जायते । यदि चाऽविद्यमाने पदे वृत्तेः आश्रयता अर्थात् 'नष्टं पदं वृत्तिमत्' इति मन्येत, तर्हि 'नष्टः घटो जलवान्' इत्यपि व्यवहारः प्रामाणिको भविष्यति । अत्र पक्षे वर्णानां युगपदेवोत्पन्नत्वेन पौर्वापर्य्यमसम्भवम्, अपि चाऽविद्यमाने पदे वृत्तेः आश्रयताऽसम्भवा इति दोषद्वयम्।



Scanned with CamScanner

तृतीयोपायखण्डनम् -

अस्मिन् पक्षे चरमवर्णपर्य्यन्तसंस्कारद्वारा समेषां वर्णानां स्मरणात्मकं प्रत्यक्षं जायते । अत्र समेषां वर्णानां स्मरणप्रत्यक्षेऽपि वर्णक्रमस्य पौर्वापर्य्यस्य स्मृतिप्रत्यक्षाभावो दृश्यते । अस्यां स्थितौ येन क्रमेण वर्णानुभवस्तेनैव क्रमेण वर्णसंस्कारः स्यादेव इत्यत्र निश्चायकस्याऽभावात् सरः रसः, नदी दीनः इत्यादिषु पदेषु कदाचित् विपरीतक्रमेण संस्कारस्योद्बोधेन सरः इत्यस्मात् अन्यस्य रस इत्यस्य, रसः इत्यस्माच्च सरः इत्यस्य स्वभिन्नस्य अर्थबोधस्याऽऽपत्तिर्जायेत ।

शाब्दिकमते वृत्त्याश्रयः स्फोटात्मकः शब्दो भवति । अयञ्च स्फोटः नित्यः, एकश्च, तस्मात् पौर्वापर्य्यव्यवहारः, विद्यमानत्वाद् वृत्त्याश्रयत्वं, भाष्यस्य 'एक इन्द्रशब्दः' इति कथनस्य च सङ्गतिर्भवति ।

चतुर्विधवाग्निरूपणम् -

वाणी चतुर्भिर्भेदैर्भिद्यते, ते च परा, पश्यन्ती, मध्यमा, वैखरीति शब्दैर्व्यवह्रियन्ते । तेषां भेदानां स्वरूपं क्रमशः निरूप्यते -

1. **परा** - पिपर्त्ति पालयति पूरयति सर्वं जगत् इति परा वाणी । इयं जगतः उपादानकारणं शब्दब्रह्मस्वरूपं वर्त्तते । मञ्जूषायां परावाचः स्वरूपम् - 'तत्र मूलाधारस्थपवनसंस्कारीभूता मूलाधारस्था शब्दब्रह्मरूपा स्पन्दशून्या बिन्दुरूपिणी परा वागुच्यते'[3] । अर्थात् ईश्वरात् सिसृक्षारूपा माया वृत्तिर्जायते । मायावृत्तितः बिन्दुरूपमव्यक्तं त्रिगुणं जायते । तस्माद् बिन्दोः शब्दब्रह्मनामको नादः उत्पद्यते, यत्र वर्णपदवाक्यानां भानं न भवति । इदं शब्दब्रह्म सर्वत्र व्याप्तमपि प्राणिनां मूलाधारचक्रे उच्चारणेच्छया उत्पन्नप्रयत्नेन सह वायोः सम्बन्धः, तेनाऽभिव्यक्तं स्फुरणरहितं सत् परा वाक् कथ्यते । अत एव आह मञ्जूषायाम् - मूलाधारचक्रे स्थितपवनस्य संस्कारेणाऽभिव्यक्ता, मूलाधारे स्थिता, शब्दब्रह्मस्वरूपा, क्रियाशून्या, त्रिगुणप्रकृतिरूपिणी परा वाक् उच्यते ।
2. **पश्यन्ती** - पश्यति सर्वं प्रपञ्चं स्वस्यां या सा पश्यन्ती वाक् । अथवा परया दृश्यते या सा पश्यन्ती । पूर्वव्युत्पत्तौ कर्त्रर्थे शतृप्रत्ययः, परव्युत्पत्तौ दृशधातोः कर्मणि बाहुलकात् शतृप्रत्ययः । मञ्जूषायां पश्यन्त्याः वाचः स्वरूपन्तु - नाभिपर्य्यन्तमागच्छता तेन वायुनाऽभिव्यक्ता मनोगोचरीभूता 'पश्यन्ती' वागुच्यते[4] इति । अर्थात् मूलाधारचक्रात् प्रचलितः संस्कृतपवनो यदा नाभिचक्रे आगतः, तदा तस्मादेव पवनात् परारूपं शब्दब्रह्म अभिव्यक्तं सत् मानसप्रत्यक्षस्य विषयो भवति । तदेव शब्दब्रह्म पश्यन्ती इत्युच्यते ।

एतत् परारूपं पश्यन्तीरूपञ्च शब्दब्रह्म क्रमशः सूक्ष्मतमं सूक्ष्मतरञ्चाऽस्ति । योगिनां निर्विकल्पकसमाधौ परा, अपि च सविकल्पकसमाधौ पश्यन्ती प्रत्यक्षा जायते ।

3. **मध्यमा** - मध्ये मा - बुद्धिः यस्याः असौ मध्यमा । हृदयोत्थितबुद्धियुतनादरूपवर्णः इत्यर्थः । तदेवोक्तं मञ्जूषायाम् - ततो हृदयपर्य्यन्तमागच्छता तेन वायुनाऽभिव्यक्ता तत्तदर्थ-



Scanned with CamScanner

वाचकस्फोटरूपा श्रोत्रग्रहणायोग्यत्वेन सूक्ष्मा जपादौ बुद्धिनिर्ग्राह्या 'मध्यमा' वागुच्यते । अर्थात् नाभिचक्रात् ऊर्ध्वमागच्छन् संस्कृतपवनो हृदयदेशं गत्वा मध्यमारूपं शब्दब्रह्म अभिव्यञ्जयति । इयं वाक् तत्तदर्थस्य वाचकस्य स्फोटस्य स्वरूपं यस्या: तादृशी, परश्रोत्रेण ग्रहीतुमयोग्यतया सूक्ष्मा, मानसिकोच्चारणकाले, स्वयं कर्णच्छिद्रस्य पिधानकाले च बुद्धिद्वारा अर्थविशेषत्वेन शब्दविशेषत्वेन च पृथक् पृथक् ग्रहणयोग्या मध्यमा उच्यते ।

4. **वैखरी** - खाय = श्रोत्रेन्द्रियाय तीव्रतारूपगुणं राति ददाति इति खरम्, विशिष्टं खरं यस्या: असौ वैखरी वाक्, परश्रोत्रग्राह्या वाणी । अस्या: वाण्या: स्वरूपमुक्तं मञ्जूषायाम् - तत आस्यपर्यन्तमागच्छता तेन वायुनोर्ध्वमाक्रामता च मूर्धानमाहत्य परावृत्त्या च तत्तत्स्थानेष्वभि-व्यक्ता परश्रोत्रेणाऽपि ग्राह्या 'वैखरी' वागुच्यते[5] । अर्थात् मुखप्रदेशमागच्छन् संस्कृतपवन: ऊर्ध्वं गच्छन् मूर्धानमाहतं कृत्वा उपरि मार्गमलब्ध्वा परावृत्त्य च तत्तत्स्थानेषु तालु-मूर्धादिस्थानेषु वैखरीरूपं शब्दमभिव्यञ्जयति, तदा परस्य स्वस्य च कर्णेन श्रवणयोग्या या वाक्, सा वैखरीत्युच्यते ।

एतदाशयेनैव शब्दतत्त्वविद्भि: शब्दस्याऽवस्थाचतुष्टयं निर्दिष्टम् -

**परा वाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता ।**
**हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा ॥**
**वैखर्या हि कृतो नाद: परश्रवणगोचर:।**
**मध्यमया कृतो नाद: स्फोटव्यञ्जक उच्यते ॥**

परा वाक् मूलाधारचक्रस्थिता, पश्यन्ती वाक् नाभौ संस्थिता, मध्यमा वाक् हृदये स्थिता, वैखरी वाक् च मुखदेशस्था बोध्या । अपि च, वैखरीरूपो वक्तुरुच्चारितो ध्वनि: परश्रोत्रग्राह्य: सन् श्रोतु: हृदये स्फोटव्यञ्जक:, अपि च मध्यमारूप: कृतो ध्वनि: स्फोटस्य अर्थात् वाचकस्य वृत्त्या-श्रयस्य शब्दस्य वक्तु: हृदये प्रकाशक: कथ्यते । वैखर्या मध्यमया इत्यत्राऽभेदे तृतीया, प्रकृत्यादि-त्वात् ।[6] तेन वैखरीरूप:, मध्यमारूपश्चेत्यर्थो लभ्यते ।

**स्फोटस्वरूपम् -**

स्फोटो नाम स्फुटति अर्थो यस्मात् स स्फोटोऽर्थात् वाचक: शब्द: । अपि च स्फुट्यते ध्वनिभिर्व्यज्यते इति स्फोटोऽर्थात् ध्वनिव्यङ्ग्य: शब्दश्चेत्येतद्व्युत्पत्तिद्वयेनाऽर्थप्रकाशकत्वमेव स्फोट-त्वम् । तथा च ध्वनिव्यङ्ग्यत्वे सत्यर्थविषयकबोधजनकत्वं स्फोटस्य लक्षणं पर्य्यवसन्नम् । लक्षणेऽस्मिन् प्रत्यक्षेऽनुमाने चाऽतिप्रसङ्गवारणाय विशेषणदलम् । चुटचुटादिध्वनिनाऽभिव्यक्ते इतोऽ-पसर्त्तव्यम् इत्याद्यर्थविशेषेऽतिप्रसङ्गवारणाय विशेष्यदलम् । विशेष्यदले बोधजनकत्वं बोधस्वरूप-योग्यत्वमेव, तेन घटपदे श्रुते कस्यचिदर्थबोधाभावेऽपि न तत्र स्फोटलक्षणस्याऽव्याप्ति: । इदञ्च स्फोटस्य तटस्थलक्षणम् ।[7] स्वरूपलक्षणञ्चोक्तं मञ्जूषाकृता - मध्यमानादव्यङ्ग्य: शब्द: स्फोटा-त्मको ब्रह्मरूपो नित्यश्चेति ।[8] अव्यवधानेन एव वक्तु: हृदये मुखे च क्रमश: अर्थवाचकस्फोटशब्द-



Scanned with CamScanner

प्रतिपादनाय मध्यमानाद:, वैखरीनादश्चोत्पद्यते । तयो: मध्यमानादो वक्तु: हृदये घटपटाद्यर्थस्य वाचकस्य स्फोटरूपशब्दस्य प्रकाशको बुद्ध्या गृह्यते । वैखरीनादस्तु वक्तृणाञ्च श्रोतृणां सकल-व्यक्तीनां श्रोत्रेन्द्रियमात्रेण ग्रहणयोग्यो ध्वनि: श्रोतु: हृदये स्फोटव्यञ्जक:, वक्तु: दृष्ट्या च भेर्य्यादिनादवत् स्फोटस्याऽव्यञ्जकत्वात् निष्प्रयोजनो भवति । अस्य स्फोटस्य शब्दत्वं, ब्रह्मत्वं, नित्यत्वञ्च वाक्यपदीयेऽनया कारिकया प्रतिपद्यते -

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।**
**विवर्त्ततेऽर्थभावेन प्रक्रिया जगतो यत: ॥**[९]

अनादिनिधनं = आदिश्च निधनञ्च आदिनिधने, न आदिनिधने यस्य तदनादिनिधन-मित्यस्याऽर्थ: आद्यन्तरहितमिति, अक्षरं = व्यापकम् यद् ब्रह्म, तदेव शब्दतत्त्वमस्ति । यस्मात् जगत: = नामरूपात्मकस्य शब्दार्थोभयरूपस्य संसारस्य प्रक्रिया = उत्पत्ति: व्यवहारश्चाऽर्थभावेन = वृक्षनदीपर्वतादिरूपेण विवर्त्तते = भासते । स्फोटोऽयं परमार्थत: एक:, अखण्डश्चाऽस्ति, तथापि पदव्यञ्जकवशात् पदं, वाक्यरूपव्यञ्जकवशात् वाक्यमिति प्रतीयते । तदुक्तं भर्तृहरिणा -

**पदे न वर्णा विद्यन्ते वाक्येष्ववयवा न च ।**
**वाक्यात्पदानामत्यन्तं प्रविवेको न कश्चन ॥**[१०]

पदे प्रतीयमाना: अपि वर्णा: न भवन्ति, एवञ्च वाक्ये अवयवा: = प्रतीयमानानि पदान्यपि न भवन्ति । वाक्यात् पदानां कोऽपि प्रविवेक: = भेदो न वास्तविकोऽस्ति ।

**स्फोटभेदा: -**

अयञ्च स्फोट: वस्तुत: एक:, नित्य:, विभु: किन्तु वर्णपदवाक्यरूपात् उपाधिभेदात् स्फोट-स्याऽष्टौ औपाधिकभेदा भवन्ति । अत्र नागेश: तान् एव विवेचयति मञ्जूषायाम् - तत्र वर्णपद-वाक्यभेदेन स्फोटस्त्रिधा । तत्राऽपि जातिव्यक्तिभेदेन पुन: षोढा । अखण्डपदस्फोटोऽखण्ड-वाक्यस्फोटश्चेति सङ्कलनयाऽष्टौ[11] स्फोटा: इति । तथा चाऽष्टौ स्फोटानां विवरणमित्थम् -

1. **वर्णव्यक्तिस्फोट:** - पदवाक्यलक्षणानाक्रान्तस्य वर्णसमूहस्य वर्णस्य वा प्रकृतिप्रत्ययरूपस्य व्याकरणेन गृहीतशक्तिकस्य पच्, तिप् इत्यादिकस्य वाचकत्वे प्रकृतिप्रत्ययरूपवर्णव्यक्ति-व्यङ्ग्य: तत्सदृश: स्फोट: वर्णव्यक्तिस्फोट: । प्रकृतिप्रत्ययघटकीभूता वर्णा अनर्थका इति न तत्र सखण्डस्फोटव्यवहार:।
2. **सखण्डपदव्यक्तिस्फोट:** - रामं, रामेण, रामायेत्यादौ परिनिष्ठिते रूपे कियानंशो द्रव्यादि-वाचक:, कियांश्च कर्म्मत्वादेरित्यस्य विनिगन्तुमशक्यतया राममित्यादि परिनिष्ठितं पदमेव वाचकं कर्म्मत्वादिविशिष्टस्येति पदस्फोटपक्ष: । तत्र सुबन्ततिङन्ततदादिघटकप्रकृतिप्रत्यय-रूपवर्णाभिव्यक्तस्फोटेनार्थप्रतीतौ सखण्डपदव्यक्तिस्फोट:, यथा पाचक:, औपगव:।

3. **सखण्डवाक्यव्यक्तिस्फोटः** – सर्वप्रथमं व्यवहारे वाक्ये एव शक्तिग्रहात् वाक्यमेव वाचकं वाक्यार्थस्येति वाक्यस्फोटपक्षः । तत्र सुबन्ततिङन्तपदजन्यबोधपूर्वकवाक्याभिव्यक्तस्फोटस्य बोधकत्वे सखण्डवाक्यव्यक्तिस्फोटः, यथा गां बधान, गां नय इत्यादि ।
4. **अखण्डपदव्यक्तिस्फोटः** – एकः पट इतिवदेकं पदमित्यबाधितप्रतीत्या वर्णातिरिक्तमेव पदमखण्डं वर्णव्यङ्ग्यम् । अखण्डेष्वपि ऋकारादिषु वर्णेषु वर्णान्तरसमानाकारैकदेशावभासो यथा, तथाऽत्र पक्षे वर्णावभासः प्रकृतिप्रत्ययजन्यबोधाभावे सति पदस्फोटेन बोधेऽखण्ड-पदव्यक्तिस्फोटः।
5. **अखण्डवाक्यव्यक्तिस्फोटः** – पदजन्यबोधाभावे सति वाक्यरूपव्यक्तिव्यङ्ग्येन तत्सदृशेन वाक्यस्फोटेन बोधेऽखण्डवाक्यव्यक्तिस्फोटः । वाक्येऽखण्डत्वञ्चापृथगुपस्थितिजनकत्वम् । उदाहरणञ्च दध्यानय, हरेऽव, विष्णोऽवेत्यादि ।
6. **वर्णजातिस्फोटः** – अनन्तानां वर्णानां वाचकत्वकल्पनापेक्षया तन्निष्ठाया जातेरेव वाचक-त्वकल्पने लाघवमिति वर्णजातिस्फोटपक्षः । यथा अनन्तासु गोव्यक्तिषु शक्तिकल्पनापेक्षया लाघवेन गोपदस्य गोत्वे शक्तिकल्पनम् । प्रकृतिप्रत्ययादिगतजातिव्यङ्ग्यः स्फोटो वर्णजाति-स्फोटः । यथा पच्त्वतित्वादिजातयः।
7. **पदजातिस्फोटः** – पूर्ववदनेकपदानां वाचकत्वकल्पनापेक्षया पदनिष्ठजातेरेव वाचकत्वमिति सुबन्ततिङन्तपदगतजातिव्यङ्ग्यः स्फोटः पदजातिस्फोटो यथा घटपदगोपदादौ घटपदत्व-गोपदत्वादिजातिः।
8. **वाक्यजातिस्फोटः** – वाक्यगतजातिव्यङ्ग्यस्फोटो हि वाक्यजातिस्फोटः । तथाहि देवदत्त गामभ्याज शुक्लां दण्डेन इत्यादिपदसंघातरूपेषु वाक्येष्वस्ति कश्चन प्रतिवाक्यं भिद्यमानो जातिविशेषः, येन प्रतिपुरुषं प्रत्युच्चारणं प्रतिक्षणं भिद्यमानेऽपि वाक्ये एकत्वप्रत्यभिज्ञा भवति। अतः पदसंघातगताया जातेरेकस्या एव वाचकत्वमिति समायाति वाक्यजातिस्फोटः।

## जातिस्फोटस्य वाचकत्वनिरूपणम् -

अष्टविधेषु स्फोटेषु वर्णनिष्ठा, पदनिष्ठा, वाक्यनिष्ठा च जातिः वाचिका भवति । इयञ्च जातिः शक्ततावच्छेदिकाऽस्ति । शक्तम् अर्थात् शक्तेः आश्रयो वर्णः, पदम्, वाक्यञ्च । शक्तता वर्णे, पदे, वाक्ये च तिष्ठति, तस्या अवच्छेदिका तादात्म्येन तत्तन्निष्ठा जातिरेव । अर्थात् वर्णनिष्ठायाः जातेः, पदनिष्ठायाः जातेः, वाक्यनिष्ठायाः जातेः एव वाचकत्वं भवतीति मन्तव्यम् । अत्र प्रमाणत्वेन हरिकारिका उद्ध्रियते – 'अनेकव्यक्त्यभिव्यङ्ग्या जातिः स्फोट इति स्मृताः'[12] इत्यस्यार्थस्तु अनेकव्यक्तिभिः अभिव्यक्ता जातिः स्फोटः अर्थात् वाचिका भवतीति । एवञ्च शास्त्रप्रक्रिया-निर्वाहार्थं, व्यवहारसम्पादनार्थञ्च वर्णाभिव्यक्तस्य वर्णस्फोटस्य, पदाभिव्यक्तस्य पदस्फोटस्य, वाक्या-भिव्यक्तस्य वाक्यस्फोटस्य च स्वीकारात् अष्टविधः स्फोटात्मकः शब्द एव वृत्त्याश्रयो बोध्यः । वस्तुतस्तु व्यवहारे वाक्येनैवाऽर्थाकाङ्क्षापूर्त्तिदर्शनात् वाक्यव्यङ्ग्यः स्फोटः वाक्यस्फोट एव



Scanned with CamScanner

वृत्त्याश्रय: स्वीकार्य्य: । अथवा लाघवानुरोधेन वाक्यव्यक्तिस्फोटस्य वाक्यजातिस्फोटस्य च मध्ये वाक्यजातिस्फोट: एव वृत्त्याश्रयो भवति ।

**ध्वनिभेद:, तत्कार्य्यञ्च-**

स्फोटो व्यङ्ग्य:, ध्वनि: तस्य व्यञ्जको भवति । प्राकृतो वैकृतश्चेति द्विविधो ध्वनि:।

1. **प्राकृतध्वनि:** - प्रकृति: अर्थात् अर्थबोधनस्य इच्छा, स्वभावो वा । तथाहि प्राकृतशब्दस्य द्विधा व्युत्पत्ति:। प्रकृत्या अर्थबोधनेच्छया प्रथमतया जात: उत्पन्न: ध्वनि: प्राकृत: ।[13] अनया व्युत्पत्त्या प्राकृतस्य स्फोटव्यञ्जकत्वं सिध्यति । तेन च प्राकृतेन स्फोटस्या-ऽभिव्यक्तिर्भवति ।
2. **वैकृतध्वनि:** - प्राकृतात् ध्वने: अनन्तरं जात: वैकृतो ध्वनिर्भवति । अयञ्च विकृति: अर्थात् विकार:, तया युक्त:, चिरकालं यावत् स्थायी, वृत्तीनाञ्च भेदको भवति ।

एतदेवोक्तं हरिणा -

**स्फोटस्य ग्रहणे हेतु: प्राकृतो ध्वनिरिष्यते ।**
**शब्दस्योर्ध्वमभिव्यक्तेर्वृत्तिभेदे तु वैकृता:॥**
**ध्वनय: समुपोहन्ते स्फोटात्मा तैर्न भिद्यते ॥**[14] इति ।

स्फोटस्य अभिव्यक्तौ प्राकृतो ध्वनि: प्रयोजको भवति । स्फोटस्याऽभिव्यक्ते: पश्चात् चिरकालोपलब्धये वैकृता: ध्वनयो वृत्तिभेदे अर्थात् द्रुतमध्यविलम्बितेति त्रिषु भेदेषु कारणानि भवन्ति, वृत्तिभेदकै: वैकृतध्वनिभि: स्फोटात्मा न भिद्यते, अपितु अखण्ड: एक एव तिष्ठति । स एवायम् अकार: इति प्रत्ययात् ।

**वृत्तिभेद: -**

स्फोटस्याऽभिव्यक्ते: पश्चात् चिरकालोपलब्धये वैकृता: ध्वनयो वृत्तिभेदे अर्थात् द्रुतमध्य-विलम्बितेति त्रिषु भेदेषु कारणानि भवन्ति, तदाह -

**अभ्यासार्थे द्रुता वृत्तिर्मध्या वै चिन्तने स्मृता ।**
**शिष्याणामुपदेशार्थं वृत्तिरिष्टा विलम्बिता ॥** इति ॥

अस्यार्थस्तु शास्त्रमभ्यसितुं द्रुता = शीघ्रोच्चारणानुकूला, चिन्तने = अर्थानुसन्धानपूर्वके स्वाध्याये मध्या = न शीघ्रतया न च मन्दतया, च शिष्याणाम् उपदेशार्थम् = पठनार्थं विलम्बिता वृत्ति: निश्चयेनेष्यते ।

**निष्कर्ष: -**

न सोऽस्ति प्रत्ययो लोके य: शब्दानुगमादृते । अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥[15] इति भर्तृहरिकारिकायां निखिलाऽर्थेनाऽनुस्यूतशब्दस्य किं स्वरूपमिति जिज्ञासा उत्पद्यते, तत्र मञ्जूषाकृता 'वस्तुतो बौद्ध एवार्थ: शक्य:, पदमपि स्फोटात्मकं प्रसिद्धमि'[16]ति सिद्धान्तेन स्फोटात्मक: शब्द: इति



Scanned with CamScanner

लभ्यते । तत्र स्फोटो नाम स्फुटति अर्थो यस्मात् स स्फोटोऽर्थात् वाचकः शब्दः। अपि च स्फुट्यते ध्वनिभिर्व्यज्यते इति स्फोटोऽर्थात् ध्वनिव्यङ्ग्यः शब्दश्चेत्येतद्व्युत्पत्तिद्वयेनाऽर्थप्रकाशकत्वमेव स्फोटत्वम् । तथा च ध्यनिव्यङ्ग्यत्वे सत्यर्थविषयकबोधजनकत्वं स्फोटस्य लक्षणं पर्य्यवसन्नम् । लक्षणेऽस्मिन् प्रत्यक्षेऽनुमाने चाऽतिप्रसङ्गवारणाय विशेषणदलम् । चुटचुटादिध्वनिनाऽभिव्यक्ते इतोऽपसर्त्तव्यम् इत्याद्यर्थविशेषेऽतिप्रसङ्गवारणाय विशेष्यदलम् । विशेष्यदले बोधजनकत्वं बोधस्वरूपयोग्यत्वमेव, तेन घटपदे श्रुते कस्यचिदर्थबोधाभावेऽपि न तत्र स्फोटलक्षणस्याऽव्याप्तिः। इदञ्च स्फोटस्य तटस्थलक्षणम् ।[17] स्वरूपलक्षणञ्चोक्तं मञ्जूषाकृता - मध्यमानादव्यङ्ग्यः शब्दः स्फोटात्मको ब्रह्मरूपो नित्यश्चेति ।[18] अत्र नैयायिकास्तु वृत्त्याश्रयः शब्दः पदमेव, स चाऽनित्यमिति मन्यन्ते । वर्णानां समूहः पदं, पदमेव वृत्त्याश्रयो भवति । किन्तु वर्णस्य क्षणिकत्वात् वर्णसमूहस्य प्रत्यक्षत्वाऽसम्भवात् कथमर्थवाचको भवतीत्यत्र उपायत्रयं तार्किकैः प्रदर्शितम् - पूर्ववर्णस्य विनष्टत्वेऽपि तस्य संस्कारवशात् अव्यवहितोत्तरत्वसम्बन्धेन पूर्ववर्णयुक्तचरमवर्णस्य प्रत्यक्षता भवति, शब्दजशब्दन्यायेन पदं प्रत्यक्षं भवति, पूर्वपूर्ववर्णानां श्रवणानुभवात् उत्पन्नसंस्कारेण सहितः योऽन्तिमवर्णश्रवणानुभवस्तेन पूर्वपूर्ववर्णसंस्कारसहितान्तिमवर्णानुभवेन सकलपूर्ववर्णविषयकक्रमिकस्मरणेन घटादिपदस्य प्रत्यक्षता भवतीति तन्न, अव्यवहितोत्तरत्वसम्बन्धस्तु द्वयोर्विद्यमानयोरेव भवति, शब्दजशब्दन्याय्येन पदप्रत्यक्षत्वस्य साधनेऽपि पदस्य विद्यमानतायाः अभावात्, अभावस्य चाऽश्रयत्वासम्भवः, एवञ्च चरमवर्णपर्य्यन्तसंस्कारद्वारा समेषां वर्णानां स्मरणात्मकप्रत्यक्षेऽपि वर्णक्रमस्य पौर्वापर्य्यस्य स्मृतिप्रत्यक्षभावदर्शनान्न तार्किकमते वर्णप्रत्यक्षं सम्भवति । अस्तु । वाणी चतुर्भिर्भेदैर्भिद्यते, ते च परा, पश्यन्ती, मध्यमा, वैखरीति शब्दैर्व्यवह्रियन्ते । अत्र वैखरीरूपो वक्त्रोच्चारितो ध्वनिः परश्रोत्रग्राह्यः सन् श्रोतुः हृदये स्फोटव्यञ्जकः, च मध्यमारूपः कृतो ध्वनिः स्फोटस्य अर्थात् वाचकस्य वृत्त्याश्रयस्य शब्दस्य वक्तुः हृदये प्रकाशकः कथ्यते । अयञ्च वृत्त्याश्रयस्फोटो वस्तुतः एकः, नित्यः, विभुः किन्तु वर्णपदवाक्यरूपात् उपाधिभेदात् स्फोटस्याऽष्टौ औपाधिकभेदा भवन्ति । 'अनेकव्यक्त्यभिव्यङ्ग्या जातिः स्फोट इति स्मृताः'[19] इत्यभियुक्तोक्त्या अनेकव्यक्तिभिः अभिव्यक्ता जातिः स्फोटः अर्थात् वाचिका भवतीति । अत्र स्फोटो व्यङ्ग्यः, ध्वनिः तस्य व्यञ्जको भवति । ध्वनिश्च द्विविधः प्राकृतो वैकृतश्चेति ।[20] एवं स्फोटस्याऽभिव्यक्तेः पश्चात् चिरकालोपलब्धये वैकृताः ध्वनयो वृत्तिभेदे अर्थात् द्रुतमध्यविलम्बितेति त्रिषु भेदेषु कारणानि भवन्ति, तदाह - अभ्यासार्थे द्रुता वृत्तिर्मध्या वै चिन्तने स्मृता ।शिष्याणामुपदेशार्थं वृत्तिरिष्टा विलम्बिता ।।[21] इति ।।

**सन्दर्भाः**

1. 01-02-64 इत्यस्मिन् सूत्रे 'एक इन्द्रशब्दः क्रतुशते प्रादुर्भूतो युगपत्सर्वयागेष्वङ्गं भवति ।'
2. प. ल. म. पृ. सं. - 304, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, 2018 ।
3. प. ल. म. पृ. सं. - 308, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, 2018 ।
4. प. ल. म. पृ. सं. - 308, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, 2018 ।



Scanned with CamScanner

5. प. ल. म. पृ. सं. - 308, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, 2018 ।
6. प्रकृत्यादिभ्य उपसङ्ख्यानमिति वार्तिकेन ।
7. यच्च यावल्लक्ष्यभावितामनुपेत्यापि व्यावर्त्तकं सल्लक्ष्यैकदेशे वर्त्तते, तथा व्यावर्त्तकमपि जायते, तदेव तटस्थलक्षणमिति वे. प. ।
8. प. ल. म. पृ. सं. - 314, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, 2018 ।
9. वा. प. का. 1 ।
10. वा. प. का. 1-63 ।
11. प. ल. म. पृ. सं. - 132, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, 2018 ।
12. वा. प. का. 1-93 ।
13. प्रकृत्याऽर्थबोधनेच्छया स्वभावेन वा जातः स्फोटव्यञ्जकः प्रथमः प्राकृतः इति प. ल. म. पृ. सं. - 321, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, 2018 ।
14. वा. प. का. 1-77-78 ।
15. वा. प. का. ब्र. का. 123
16. प. ल. म. पृ. सं. - 216, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, 2018 ।
17. यच्च यावल्लक्ष्यभावितामनुपेत्यापि व्यावर्त्तकं सल्लक्ष्यैकदेशे वर्त्तते, तथा व्यावर्त्तकमपि जायते, तदेव तटस्थलक्षणमिति वे. प. ।
18. प. ल. म. पृ. सं. - 314, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, 2018 ।
19. वा. प. का. 1-19 ।
20. स्फोटस्य ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते ।
    शब्दस्योर्ध्वमभिव्यक्तेर्वृत्तिभेदे तु वैकृताः ॥
    ध्वन्यः समुपोहन्ते स्फोटात्मा तैर्न भिद्यते । इति भर्त्तृहरेः वा. प. का. 1-77-78 इत्यत्र प्राकृतवैकृतयोः स्वरूपमुक्तम् ।
21. प. ल. म. पृ. सं. - 321, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, 2018 ।

## सन्दर्भग्रन्थसूची


1. साहित्यदर्पणः, श्रीविश्वनाथाचार्य्यः, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी, प्रथमसंस्करणम्, 2013
2. काव्यप्रकाशः, श्रीमम्मटाचार्यः, सम्पादकः - डा. नरेन्द्रः, ज्ञानमण्डललिमिटेड, वाराणसी, षष्ठसंस्करणम्, 2010
3. प्रौढनिबन्धसौरभम्, आचार्यविश्वनाथमिश्रः, राष्ट्रियसंस्कृतसाहित्यकेन्द्रम्, जयपुरम्, प्रथमसंस्करणम्, 2003




Scanned with CamScanner

4. मीमांसायां काव्यशास्त्रे च शब्दशक्तिः, विरूपाक्ष वि. जड्डीपाल, अमरग्रन्थपब्लिकेशन्स, दिल्ली, प्रथमसंस्करणम्, 2002
5. शब्दशक्तिप्रकाशिकासमीक्षणम्, डा. विष्णुपदमाहापात्रः, मान्यताप्रकाशनम्, मायापुरी, प्रथमसंस्करणम्, 2005
6. वैयाकरणानामन्येषाञ्चमतेनशब्दस्वरूपतच्छक्तिविचारः, डा. कालिकाप्रसादशुक्लः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, प्रथमसंस्करणम्, 2001
7. परमलघुमञ्जूषा, श्रीनागेशभट्टः, व्याख्याकारः - प्रो. बोधकुमारझाः, हंसाप्रकाशन, जयपुर, प्रथमसंस्करणम्, 2018
8. परमलघुमञ्जूषा, श्रीनागेशभट्टः, व्याख्याकारः - डा. जयशङ्करलालत्रिपाठी, चौखम्बाकृष्णदास अकादमी, वाराणसी, चतुर्थसंस्करणम्, 2011
9. तत्त्वचिन्तामणिः, श्रीगङ्गेशोपाध्यायः, सम्पादकः - श्रीमदुमेशमिश्रः, मिथिलाविद्यापीठः, प्रथमसंस्करणम्, 1957
10. शब्दशक्तिप्रकाशिका, श्रीजगदीशतर्कालङ्कारः, व्याख्याकारः - श्रीयोगगुरुचरणदेवशर्म्मा, कलिकाताविश्वविद्यालयः, कलिकाता, 1914
11. काव्यप्रकाशः, श्रीमम्मटाचार्य्यः, व्याख्याकारः - श्रीहरिशङ्करशर्म्मा, चौखम्भासंस्कृतसंस्थानम्, वाराणसी, दशमसंस्करणम्, वि.2060

शोधच्छात्रा,
व्याकरणविभागः,
राष्ट्रियसंस्कृतसंस्थानम्,
क.जे.सोमैयासंस्कृतविद्यापीठम्,
विद्याविहारः (पू),
मुम्बई - ४०००७७, महाराष्ट्रम् ।
दू.स. - ९८१९११८०२४

★★★



Scanned with CamScanner

# संस्कृत-विमर्शः

(An International Refereed & Peer-Reviewed Research Journal, UGC-CARE Listed)

## नवशृङ्खला

संयुक्ताङ्कः 15-16 वर्षम् 2019

ISSN : 0975-1769

( जुलाई 2018 - जून 2019 )

राष्ट्रियसंस्कृतसंस्थानम्

( भारतशासन-मानवसंसाधनविकासमन्त्रालयाधीनः,
राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा 'ए'-श्रेण्या प्रत्यायितः समविश्वविद्यालयः )

नवदेहली

Scanned with CamScanner

# विषयानुक्रमणिका


| | | | |
|---|---|---|---|
| | परामर्शदातृ-समितिः | | *v* |
| | Advisory Board | | *vi* |
| | समीक्षा-समितिः/सम्पादक-मण्डलम् | | *vii* |
| | Review Committee/Editorial Board | | *viii* |
| 1. | **प्रकृति का संरक्षण-पर्यावरण की स्थिरता का चिरन्तन समाधान** | –प्रो. रमाकान्त पाण्डेय | 1 |
| 2. | **Vibhakti and Kāraka : Paṇinian Perspective** | –Devanand Shukla & Preeti Shukla | 15 |
| 3. | **धात्वर्थफलप्रतिपत्तिः** | –डॉ. रामसलाहीद्विवेदी | 21 |
| 4. | **संस्कृत बालसाहित्य : कुछ चुनौतियाँ** | –डॉ. श्रीमती राजकुमारी त्रिखा | 28 |
| 5. | **भट्टनागेशरीत्या तार्किकमतनिरसनपूर्वकः शाब्दबोधसहकारिकारणविमर्शः** | –सुश्रीविदुषी बोल्ला | 34 |
| 6. | **ध्वनेरलक्ष्यक्रमव्यवस्था** | –प्रो. रामकुमारशर्मा | 42 |
| 7. | **गुणपदार्थविमर्शः** | –डॉ. मधुकेश्वरभट्टः | 48 |
| 8. | **संस्कृतशास्त्रे गणितविज्ञानम्** | –डॉ. रावूरि गायत्रीमुरलीकृष्णः | 55 |
| 9. | **अचिन्त्यभेदाभेदवाद : एक विमर्श** | –डॉ. अंजना शर्मा | 62 |
| 10. | **मानवता का संदेशवाहक तर्जनी काव्य** | –मंगला ठाकुर | 72 |
| 11. | **सीतारामशास्त्री प्रणीत सीतारावणसंवादझरी - एक सर्वेक्षण** | –डॉ. वत्सला | 82 |


Scanned with CamScanner

संस्कृत-विमर्शः 2019 ( अङ्कः 15-16 )
ISSN : 0975-1769

# भट्टनागेशरीत्या तार्किकमतनिरसनपूर्वकः शाब्दबोधसहकारिकारणविमर्शः

-सुश्रीविदुषी बोल्ला
अनुसन्धात्री, के.जे. सोमैयापरिसरः, मुम्बई

**[ अस्मिन् शोधपत्रे लेखिकया शाब्दबोधसहकारिकारणानाम् आकाङ्क्षा-योग्यता-आसत्ति-तात्पर्याणाम् निरूपणं कृतं वर्तते। एतानि चतुर्विधानि सहकारिकारणानि शाब्दबोधे कथं सहायकानि भवन्ति, किञ्च तेषां स्वरूपम् इत्यादिविषयाः उपवर्णिताः अत्र। -सं० ]**

शाब्दबोधे वृत्तिविशिष्टज्ञानस्य मुख्यकारणत्वम्। मुख्यकारणञ्च करणरूपम्। एतदतिरिक्तान्यपि कानिचित् कारणानि, यानि शाब्दबोधे सहकुर्वन्ति। तानि सहकारिकारणानि उच्यन्ते। एवञ्च मुख्यकारणजन्यकार्य्यजनकत्वे सति मुख्यकारणभिन्नकारणत्वं सहकारिकारणत्वम्, सहकारिकारणानि चतुर्विधानि आकाङ्क्षा, योग्यता, आसत्तिः, तात्पर्य्यञ्चेति। तत्रादौ सहकारिकारणानां विमर्शे विमृष्टांशाः सन्ति -

**1. आकाङ्क्षानिरूपणम्**

(1.1) आकाङ्क्षालक्षणम्

(1.2) आकाङ्क्षायाः अर्थनिष्ठत्वम्

(1.3) आकाङ्क्षाव्यवहारक्षेत्रम्

(1.4) परिशीलनम्

**2. योग्यतानिरूपणम्**

(2.1) योग्यतालक्षणम्

(2.2) न्यायमतखण्डनम्

(2.3) शाब्दबोधकारणत्वनिराकरणम्

**3. आसत्तिनिरूपणम्**

(3.1) आसत्तिस्वरूपम्

(3.2) आसत्तेः शाब्दबोधकारणत्वखण्डनम्



Scanned with CamScanner

4. तात्पर्य्यनिरूपणम्

(4.1) तात्पर्य्यलक्षणम्

(4.2) शक्त्या तस्यान्यथासिद्धत्वस्य निरासः

## 1. आकाङ्क्षानिरूपणम्

**(1.1) आकाङ्क्षालक्षणम्** – मञ्जूषायां भट्टनागेशेन आकाङ्क्षानिरूपणाऽवसरे लक्षणद्वयमुक्तम् –

**1. वाक्यसमयग्राहिकाऽऽकाङ्क्षा**[1] – अत्राऽऽदौ आकाङ्क्षा नाम वाक्यसमयग्राहिकाकाङ्क्षा। अत्र वाक्यस्य यः शक्तिरूपः सङ्केतः तस्य सङ्केतविषयकबोधस्योत्पादिकाऽऽकाङ्क्षा कथ्यते।

**2. उत्थापकताविषयतान्यतरसम्बन्धेनोभयसम्बन्धेन वाऽर्थान्तरजिज्ञासा आकाङ्क्षा**[2]–उत्थापकता–विषयता इत्येतत्सम्बन्धयोः अन्यतरेण अर्थात् केनचित् एकेन सम्बन्धेन, अथवा एतत्सम्बन्धद्वयेनाऽपरपदार्थस्य जिज्ञासा आकाङ्क्षा उच्यते।

**अन्यतरसम्बन्धेनेत्यस्योदाहरणम्** – 'पश्य मृगो धावति' इत्यत्र 'पश्य' पदार्थस्य दर्शनक्रियायाः धावनरूपकर्मणः अर्थान्तरस्य जिज्ञासा वर्त्तते, अतः दर्शनार्थे उत्थापकतासम्बन्धेनाऽऽकाङ्क्षा तिष्ठति, धावनेऽर्थे तु विषयतासम्बन्धेनाऽऽकाङ्क्षा तिष्ठति।

**उभयसम्बन्धेनेत्यस्योदाहरणम्** – 'पचति तण्डुलं देवदत्तः' इत्यत्र पाकक्रिया देवदत्तरूपं कर्त्तारं, तण्डुलरूपं कर्म्म च जिज्ञासते, यतो हि कारकं विना क्रियायाः उपपत्तिर्न भवितुमर्हति। कर्त्तृकर्म्मकारकञ्च क्रियां जिज्ञासते। एवञ्च पाकक्रियायां, देवदत्ततण्डुलरूपकर्त्तृकर्म्मणोश्च परस्परमाकाङ्क्षायाः उत्थापकता तिष्ठति। तथा विषयताऽप्युभयत्राऽस्ति।

**(1.2) आकाङ्क्षायाः अर्थनिष्ठत्वम्** – सा च आकाङ्क्षा एकपदार्थस्य ज्ञानानन्तरं तस्मिन् पदार्थेऽन्वययोग्यस्य पदार्थस्य यज्ज्ञानं, तज्ज्ञानविषयिणी 'अस्य सम्बन्धी अर्थः कः?' इत्येवंरूपा इच्छा, या पुरुषे तिष्ठति। एवञ्च ज्ञानविषयविषयिणी आकाङ्क्षा। यथा ज्ञानं घटादिपदार्थज्ञानम्, तस्य विषयः आनयनादियोग्यपदार्थस्य ज्ञानम्, तस्य विषयिणी आकाङ्क्षेति। यद्यपि समवायसम्बन्धेनात्मनिष्ठैवाऽऽकाङ्क्षा न्यायमते, वेदान्तिमते तु तादात्म्येनाऽन्तःकरणनिष्ठा, तथापि तस्याः आकाङ्क्षायाः विषयभूतेऽर्थेऽऽरोपात् आकाङ्क्षाऽर्थनिष्ठाऽपि, अतोऽयमर्थोऽर्थान्तरमाकाङ्क्षतीति

---

1. प.ल.म. पृ.स.–334, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, 2018
2. प.ल.म. पृ.स.–338, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, 2018

Scanned with CamScanner

व्यवह्रियते। इदमेव अभिधानाऽपर्य्यवसानमर्थात् अर्थबोधनस्य असमाप्तिरित्युच्यते। अर्थबोधस्याऽनन्तरमेवाऽन्वयिनोऽर्थस्य जिज्ञासोदयादर्थे एवाऽऽरोपः, न तु पदे प्रमाणाभावात्। 'पदं साकाङ्क्षमि'त्यत्र तु साकाङ्क्षमित्यस्य साकाङ्क्षार्थबोधके लक्षणया 'पदं साकाङ्क्षार्थबोधकमि'त्येवाऽर्थः।आकाङ्क्षाऽर्थनिष्ठेत्यत्र भाष्यप्रमाणन्तु – 'परस्परव्यपेक्षां सामर्थ्यमेके। का पुनश्शब्दयोर्व्यपेक्षा? न ब्रूमश्शब्दयोरिति, किं तर्हि अर्थयोरिति।'

**( 1.3 ) आकाङ्क्षाव्यवहारक्षेत्रम्** – एकपदार्थे घटादिपदार्थे अपरपदार्थस्य आनयनादिपदार्थस्य व्यतिरेकेण ज्ञानस्य अभावेन अन्वयबोधाजनकत्वस्य शाब्दबोधजनकत्वाभावस्य घटपदार्थे विद्यमानो ज्ञानविशेषः आकाङ्क्षोत्थापकः। आकाङ्क्षाजनकज्ञानस्य विषये घटपदार्थनिष्ठान्वयबोधजनकत्वाभावरूपेऽपि आकाङ्क्षा-व्यवहारः। अत्रेदं बोध्यम् – तादृशान्वयबोधाजनकत्वेऽपि आकाङ्क्षा इति व्यवहारः इति। ज्ञानविशेषस्य विषयेऽन्वयबोधाजनकत्वेऽपि आकाङ्क्षा इति व्यवहरते। परं शाब्दबोधे आकाङ्क्षा न कारणम्, अपितु आकाङ्क्षाज्ञानं कारणम्, अतः ज्ञानविशेषविषयकस्याऽन्वयबोधाजनकत्वस्य ज्ञानं शाब्दबोधं प्रति कारणं भवतीति। शाब्दबोधे आकाङ्क्षाज्ञानस्य कारणत्वादेव 'घटमानय' इति वाक्यवत् 'घटः कर्म्मत्वम् आनयनं कृतिः' इति शब्दस्य च विभक्त्यर्थस्य समूहात् न शाब्दबोधो भवति, आकाङ्क्षाभावात्। यतो विभक्त्यन्ताख्यातान्तयोरेव साकाङ्क्षार्थबोधकत्वमतो 'घटः कर्म्मत्वम् आनयनं कृतिः' इत्यत्राऽऽकाङ्क्षविरहत्वम्। एतेनेदमायाति पदसमभिव्याहारः आकाङ्क्षेति।[1] समभिव्याहारश्च नियतपौर्वापर्य्यम्। नीलो घटः इत्यत्र स्वन्तनीलपद-समभिव्याहृतस्वन्तघटपदत्वरूपा आकाङ्क्षा तु स्वन्तनीलपदस्य तथा स्वन्तघटपदस्य समभिव्याहाररूपा।

**( 1.4 ) परिशीलनम्** – अन्वयबोधाजनकत्वज्ञाने शाब्दबोधप्रयोजकतत्तत्सम-भिव्याहारनिष्ठकारणताज्ञानं कारणम्, 'अस्यान्वय्यर्थः कः' इत्याकाङ्क्षाज्ञानेऽन्वय-बोधाजनकत्वं ज्ञानविशेषविषयः कारणम्। तथा च व्यवहारप्रामाण्यात् आकाङ्क्षाज्ञान-कारणेऽप्याकाङ्क्षात्वव्यवहारः। मुख्या आकाङ्क्षा तु समवायेन, उत्थापकतया, विषयतया वा सम्बन्धेन 'अस्यान्वयी कः' इत्येवंरूपा बोध्या। तत्र समवायेन पुरुषनिष्ठाया आकाङ्क्षाया अर्थे आरोपः, तदितरेण चानारोपितैवाऽऽकाङ्क्षा अर्थे इति दिक्।

## 2. योग्यतानिरूपणम्

**( 2.1 ) योग्यतालक्षणम्** – मञ्जूषायां योग्यतालक्षणमुक्तम् – परस्परान्वय-

---

1. व्युत्पत्तिवाददर्शः – अभेदात्तयबोधप्रकरणम्।

Scanned with CamScanner

प्रयोजकधर्म्मवत्त्वमिति।[1] अर्थात् एकपदार्थे अपरपदार्थस्य अन्वयस्य यः हेतुभूतः धर्म्मः स धर्म्म एव योग्यता। शाब्दबोधे योग्यताज्ञानस्य कारणत्वस्वीकारेण 'पयसा सिञ्चति' इति वाक्यं योग्यतावद् भूत्वा अबाधितार्थविषयकं शाब्दबोधजनकं भवति। अस्मिन् वाक्ये एकः पयःपदार्थः, अपरश्च सेचनपदार्थः। तयोः परस्परमन्वयप्रयोजको धर्म्मः 'द्रवद्रव्यत्वं' जले, 'आर्द्रीकरणत्वं' च धर्म्मः सेचने। एवञ्च परस्परान्वयस्य = सेकान्वयस्य जलान्वयस्य, प्रयोजकधर्म्मस्य = द्रवद्रव्यत्वस्य आर्द्रीकरणत्वस्य च, पयः पदार्थे जले सिञ्चतिपदार्थे च सेके विद्यमानत्वात् योग्यतारूपकारणसत्त्वात् 'पयसा सिञ्चति' इति वाक्यं शाब्दबोधजनकम्। योग्यतायाः शाब्दबोधे कारणत्व-स्वीकारादेव 'वह्निना सिञ्चति' इति वाक्यमयोग्यतावत् अस्ति, अतोऽबाधितार्थ-विषयकं शाब्दबोधं न जनयति। वह्निपदार्थस्य सेकपदार्थे अन्वयप्रयोजकधर्म्मस्य द्रवद्रव्यत्वस्याऽभावात्।

( 2.2 ) **न्यायमतखण्डनम्** – अयोग्यवाक्यादपि बौद्धमर्थमादाय शाब्दबोधो भवति, किन्तु स बोधः अबाधितार्थविषयकोऽर्थात् प्रामाणिको न भवति इति वैयाकरणमतम्। तस्य शाब्दबोधस्य प्रामाणिकत्वस्वीकारे बौद्धार्थविषये जनानां प्रवृत्तिः स्यात्, सा च प्रवृत्तिर्न भवति अतोऽयोग्यवाक्यात् बाधितार्थविषयक एव शाब्दबोधोऽत्र मते स्वीक्रियते। न्यायमते चाऽयोग्यवाक्येषु न पदार्थानां परस्परम् अन्वयबोधः, बाधज्ञानात् केवलं प्रत्येकं पदात् पदार्थबोध एव भवतीति। तन्न, अयोग्ये योग्ये च वाक्ये सर्वत्र बौद्धार्थस्यैव शाब्दबोधविषयत्वेन बाधस्य अभावज्ञानस्य अभावात्। भर्तृहरिरपि सर्वत्र बौद्धार्थज्ञानं समर्थयते – अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति च इति।

( 2.3 ) **शाब्दबोधकारणत्वनिराकरणम्** – बौद्धार्थस्वीकाराद् वन्ध्यादिसुतादि-शब्दानां बाह्यार्थशून्यानामप्यर्थवत्त्वात् प्रातिपदिकत्वं, ततः सुबुत्पत्तिश्च भवति। अपि च 'वह्निना सिञ्चति' इति वाक्याद् बौद्धार्थबोधो भवति, अत एव तद्वाक्यप्रयोक्तारं प्रति श्रोता उपहासं कुर्वन् ब्रवीति– 'अद्रवेण वह्निना कथं सेकं ब्रवीषि' इति। यदि शाब्दबोधो न स्यात्, तर्हि एतादृशः उपहासः कथं स्यात्? अतोऽयोग्यवाक्यादपि बौद्धार्थविषयकः शाब्दबोधः स्वीकर्त्तव्य एव। अत्रेदं बोध्यम्–प्रामाणिके ज्ञाने सत्येव जनानां प्रवृत्तिर्दृश्यते, अप्रमात्मकेऽप्रवृत्तिश्च। यदा श्रोता अयोग्यं वाक्यं शृणोति, तदा बौद्धार्थमाश्रित्य तस्मिन् शाब्दबोधस्तु जायते, किन्तु स जानाति यदयं बोधो न बाह्यार्थविषयको वास्तविकः, अपितु अवास्तविकः, अतस्तस्य न तदर्थे प्रवृत्तिः।

---

1. प.ल.म. – योग्यताप्रकरणम्

Scanned with CamScanner

एवञ्चाऽयोग्यवाक्यादपि शाब्दबोधेऽर्थात् योग्यताज्ञानरूपकारणाभावेऽपि शाब्दबोधरूप-कार्य्योत्पत्तौ सत्यां व्यतिरेकव्यभिचारान्न योग्यताज्ञानस्य कारणत्वं शाब्दबोधेऽस्ति।

## 3. आसत्तिनिरूपणम्

**(3.1) आसत्तिस्वरूपम्** - आसत्तेः स्वरूपन्तु - प्रकृतान्वयबोधानुकूल-पदाव्यवधानमासत्तिः। प्रकृतश्च अन्वयबोधः प्रकृतान्वयबोधः प्रकरणविषयशाब्दबोधः तस्य जनकपदस्य व्यवधानाभावोऽऽसत्तिः। व्यवधानञ्चात्र द्विविधम्-कालकृतम्, प्रकृतानुपयोगिपदकृतञ्च। लक्षणे कालकृतव्यवधानाभावस्वीकारेण इदानीमुच्चरितस्य 'देवदत्त' इति पदस्य प्रहरादिव्यवधानाभावस्वीकारेण च 'देवदत्तो ग्रामं गच्छति' इत्यादौ ग्रामपदेन व्यवधानेऽपि देवदत्तगच्छतिपदार्थयोः आसत्तिः अव्याहतैवेति शाब्दबोधोपपत्तिः। एवञ्च पदाव्यवधानत्वं पूर्वपदाविर्भावाधिकरणक्षणाव्यवहितोत्तर-क्षणवृत्तित्वम्। तथाहि प्रकरणविषयकस्याऽन्वयबोधस्य जनकपदस्य कालकृतं प्रकृतान्वयबोधानुपयोगिपदकृतञ्च व्यवधानराहित्यमेवाऽऽसत्तिरिति फलति। आसत्तिलक्षणे 'प्रकृतान्वय-बोधानुकूले'त्यस्य निवेशेन 'स्थाल्यामोदनं पचती'त्यादौ 'स्थाल्यामि'त्यस्य 'पचति' इत्यस्य च मध्ये 'ओदन'पदेन व्यवधाने सत्यपि तस्य ओदनस्य प्रकृतान्वय-बोधानुकूलत्वात् प्रकृतस्य स्थाल्यधिकरणकपाकक्रियारूपस्याऽन्वयबोधस्याऽनुकूलत्वात् स्थाल्याः पाकक्रियायां कर्म्मद्वारा अन्वयोपयोगित्वात् आसत्तिः अक्षतैव तिष्ठति। आसत्तिविषयः आसन्नः इत्युच्यते, आसत्तेः अविषयश्च अनासन्न उच्यते। आसन्नस्यो-दाहरणम् - 'गिरिरग्निमानि'ति। अत्र प्रकृतान्वयबोधः गिरिः अग्निमदभिन्नः, तदनुकूलपदयोः गिरिरग्निमान् इत्यनयोः अव्यवधानसत्त्वात् आसत्तिः। अनासन्नस्योदा-हरणम् - गिरिर्भुक्तमग्निमान् देवदत्तेन इति। अत्र प्रकृतान्वयबोधः अग्निमदभिन्नगिरि-विषयकदेवदत्तकर्तृकभोजनविषयकः, तदनुकूलपदानि 'अग्निमान् गिरिः', 'देवदत्तेन भुक्तम्' इति, तेषां क्रमशः 'भुक्तम्, अग्निमान्' इति पदाभ्यां व्यवधानेन तेषामव्यवधानासत्त्वात् अनासत्तिः।

**(3.2) आसत्तेः शाब्दबोधकारणत्वखण्डनम्** - इयमासत्तिः मन्दबुद्धेः कृतेऽविलम्बेन शाब्दबोधे कारणम्। अमन्दबुद्धेः जनस्य तु आसत्तिरूपकारणाभावेऽपि पदार्थोपस्थितौ सत्यामाकाङ्क्षादिमाहात्म्यात् अविलम्बेनैव बोधो जायते, अतः तत्कृते न आसत्तिः कारणम्। अस्याः शाब्दबोधाऽभावे 'न पदान्तद्विर्वचनवरेयलोपस्वर-सवर्णानुस्वारदीर्घजश्चर्विधिषु' इत्यस्मिन् सूत्रे भाष्यकृताऽपि प्रतिपादितम्, उक्तञ्च - "अनानुपूर्व्येणाऽपि सन्निष्टानां यथेष्टम् अभिसम्बन्धो भवति। तद्यथा 'अनड्वाहमुदहारि या त्वं हरसि शिरसा कुम्भं भगिनि साचीनमभिधावन्तमद्राक्षीः' इति। तस्य यथेष्टमभिसम्बन्धः 'उदहारि! भगिनि! या त्वं कुम्भं हरसि शिरसा अनड्वाहं साचीनम् अभिधावन्तमद्राक्षीरि'ति" इत्युक्तम्।

## 4. तात्पर्य्यनिरूपणम्

**( 4.1 ) तात्पर्य्यलक्षणम्** – सामान्यतो वक्तुरिच्छा तात्पर्य्यमस्ति[1]। मञ्जूषायां तात्पर्य्यलक्षणमुक्तम् – 'एतद् वाक्यं पदं वा एतदर्थबोधायोच्चारणीयमितीश्वरेच्छा तात्पर्य्यम्'[2]। अर्थात् एतद् वाक्यम्, एतत् पदं वा एतस्याऽर्थस्य बोधाय उच्चारणविषयो भवतु इति ईश्वरेच्छारूपं तात्पर्य्यं कथ्यते। अत्र ईश्वरपदं वक्तृमात्रोपलक्षकम्, अत एव नानाशक्तिमति विष्णुसूर्य्यादिवाचके हर्य्यादिशब्दे प्रयुक्ते सति लोके तात्पर्य्यन्तु उच्चारयितुः इच्छारूपम् एव ग्राह्यम्, तत्र ईश्वरेच्छाया अभावात्। तात्पर्य्यस्य शाब्दबोधे कारणता भवति, अत एव सर्वे सर्वार्थवाचकाः इति शाब्दिकसिद्धान्ते घटशब्दात् पटबोधो न भवति, पटार्थबोधे घटस्य तात्पर्य्याभावात्। तात्पर्य्यस्य स्वरूपन्तु – 'एतत्पदम् एतद्वाक्यं वा एतदर्थबोधनाय मया उच्चार्य्यते इति रूपम्'।तस्य तात्पर्य्यस्य च नियामकं लोके प्रकरणलिङ्गादिकम् एव, नानार्थस्थले शक्तिनियामकवद् भवति। प्रकरणस्य तात्पर्य्यग्राहकत्वात् एव 'सैन्धवम् आनय' इति उच्चारिते भोजनप्रकरणात् लवणबोधः, युद्धप्रकरणाच्च अश्वबोधः। वेदे चाऽस्मदादेः उच्चारयितुः अभावात् ईश्वरेच्छारूपतात्पर्य्यात् एव शाब्दबोधः। वेदस्य ईश्वरोच्चरितत्वमतेनेदं बोध्यम्। वेदस्याऽनुच्चरितत्वमतेन चाऽनादीच्छारूपं तात्पर्य्यम्।

**( 4.2 ) शक्त्या तस्यान्यथासिद्धत्वस्य निरासः** – प्रकरणादिना शब्दार्थशक्ति-निश्चयेऽऽकाङ्क्षादिना शाब्दबोधे सम्भवे तात्पर्य्यस्य शाब्दबोधम्प्रति न कारणत्वमिति न वाच्यम्, प्राथमिके शाब्दबोधे जातेऽपि नानार्थकस्थले 'तात्पर्य्यं क्वेति न जानीमः' इत्यनुभवात्। तात्पर्य्यस्य कारणत्वस्वीकारे एतादृशानुभवः एव प्रमाणम्। अर्थात् शक्त्या निर्वाहो भवितुं न शक्यः कथन्तु शक्तिज्ञानेन शाब्दबोधस्तु श्रोतुः भवति, परं स शाब्दबोधः प्रामाणिको न वेति निर्णयः तात्पर्य्यनिर्णयादेव भवितुमर्हति, न हि शक्तिनिर्णयात्। तदेवं तात्पर्य्यज्ञानं शक्तिज्ञानानन्तरं शाब्दबोधे सन्देहनिवृत्त्यर्थमुपयुज्यते। अत एव अप्रकरणज्ञं जनम्प्रति यदि 'पयः आनय' इति कथ्यते, तदा पयश्शब्दस्य शक्तिद्वयेन द्विविधशाब्दबोधे जाते तस्य मनसि प्रश्नः उपपद्यते – 'किमानेयम्? दुग्धं जलं वे'ति। अयञ्च प्रश्नः शाब्दबोधे तात्पर्य्यज्ञानस्य कारणत्वे एव भवितुमर्हः। यदि कारणं न स्यात् तर्हि तात्पर्य्यविषये शाब्दबोधसमये प्रश्नोऽपि न स्यात्।

## 5. निष्कर्षः

शाब्दबोधे वृत्तिविशिष्टज्ञानं मुख्यकारणम्, एतदतिरिक्तान्यपि कानिचित् कारणानि, यानि शाब्दबोधे सहकुर्वन्ति, तानि सहकारिकारणानि उच्यन्ते। एवञ्च मुख्यकारण-

---

1. कारिकावली शब्दप्रकरणम्।
2. कारिकावली शब्दप्रकरणम्।

Scanned with CamScanner

जन्यकार्य्यजनकत्वे सति मुख्यकारणभिन्नकारणत्वं सहकारिकारणत्वम्, सहकारिकारणानि च चतुर्विधानि – आकाङ्क्षा, योग्यता, आसत्तिः, तात्पर्य्यञ्चेति। अत्र 'पदविशिष्टपदत्वमाकाङ्क्षा, वैशिष्ट्यञ्च स्वाव्यवहितपूर्ववृत्तित्वस्वाव्यवहितोत्तरवृत्तित्वाऽन्यतरसम्बन्धेने'ति। यथा 'नीलो घटः' इत्यत्र पदं नीलपदम्, तद्विशिष्टपदं घटपदमिति, वैशिष्ट्यञ्च स्वं नीलपदं, तदव्यवहितोत्तरवृत्तिः घटपदस्य, तद्वृत्तित्वं घटपदे एवञ्च नीलपदविशिष्टघटपदत्वम् आकाङ्क्षा, एवमेव स्वपदेन घटपदं गृह्यते, तदव्यवधानपूर्ववृत्तिः नीलपदस्य, तद्वृत्तित्वं नीलपदे एवं घटपदविशिष्टनीलपदत्वमाकाङ्क्षेति। तथा च 'पदसमभिव्याहारः आकाङ्क्षा' भवति।

चतुर्षु सहकारिकारणेषु द्वितीयं कारणं योग्यता नाम परस्परान्वयप्रयोजकधर्म्मवत्त्वमिति। यथा पयसा सिञ्चतीति वाक्ये एकः पयः पदार्थः, अपरश्च सेचनपदार्थः। तयोः परस्परमन्वयप्रयोजको धर्म्मः द्रवद्रव्यत्वं जले, आर्द्रीकरणत्वञ्च धर्म्मः सेचने। एवञ्च सेकान्वयस्य जलान्वयस्य प्रयोजकधर्म्मस्य द्रवद्रव्यत्वस्याऽऽर्द्रीकरणत्वस्य च पयःपदार्थे जले सिञ्चतिपदार्थे च सेचने विद्यमानत्वात् योग्यतारूपकारणसत्त्वात् पयसा सिञ्चतीति वाक्यं योग्यम्। योग्यताऽभावेऽपि शाब्दबोधो भवत्येव, बौद्धार्थस्य स्वीकारात्। यथा वन्ध्यासुतादीनां बाह्यार्थत्वादर्थवत्त्वात्प्रातिपदिकत्वं, शाब्दबोधश्च।

**तृतीयं कारणमासत्तिः** – प्रकृतान्वयबोधानुकूलपदाव्यवधानमासत्तिः।[1] इदानीमुच्चरितस्य देवदत्त इति पदस्य प्रहराद्यव्यवधानेनोच्चरितेन गच्छतीति पदेन शाब्दबोधो जायते। इयमासत्तिरपि शाब्दबोधे न कारणं, मन्दबुद्धेरपि आसत्तिज्ञानविरहे विलम्बेन शाब्दबोधदर्शनात्।

**अन्तिमं कारणस्ति तात्पर्य्यम्** – एतद्वाक्यं पदं वा एतदर्थबोधायोच्चारणीयमितीश्वरेच्छा तात्पर्य्यम्। अत्र ईश्वरपदं वक्तृमात्रोपलक्षकम्। यथा सैन्धवमानयेति वाक्यं, सैन्धवमिति पदं भोजनसमये वक्त्रा लवणार्थबोधायोच्चारितमिति, तत्र सैन्धवस्य लवणार्थे तात्पर्य्यत्वात् लवणबोधः। युद्धसमये त्वश्वबोधको भवति। एवं तात्पर्य्यनिर्णयस्य ज्ञाने प्रामाण्यनिश्चयद्वारा प्रवृत्तौ, क्वचिदनेकपदार्थस्याऽन्वययोग्यत्वे कस्याध्याहार इत्यत्र चोपयोगः, न तु शाब्दबोधकस्य कारणत्वम्, अस्याऽभावेऽपि सन्देहजन्यशब्दबोधस्य जायमानत्वात्।

चतुर्षु सहकारिकारणेषु वस्तुतः आकाङ्क्षाज्ञानमेव शाब्दबोधे कारणम्, तद्विना शाब्दबोधाभावात्। एतदतिरिच्य योग्यताज्ञानं विनाऽपि बौद्धार्थविषयकशाब्दबोधो जायते। एवमेवाऽऽसत्तिज्ञानं विनाऽपि अमन्दबुद्धेः शीघ्रतया, मन्दबुद्धेर्विलम्बेन शाब्दबोधो भवत्येव। तथा च तात्पर्य्यज्ञानाभावेऽपि सन्देहात्मकशाब्दबोधस्तु जायत एव।

---

1. कारिकावली शब्दप्रकरणम्।

Scanned with CamScanner

## सहायकग्रन्थसूची


1. साहित्यदर्पणः, श्रीविश्वनाथाचार्य्यः, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी, प्रथमसंस्करणम्, 2013
2. काव्यप्रकाशः, श्रीमम्मटाचार्यः, सम्पादकः – डाङ्ग नरेन्द्रः, ज्ञानमण्डललिमिटेड, वाराणसी, षष्ठसंस्करणम्, 2010
3. प्रौढनिबन्धसौरभम्, आचार्यविश्वनाथमिश्रः, राष्ट्रियसंस्कृतसाहित्यकेन्द्रम्, जयपुरम्, प्रथमसंस्करणम्, 2003
4. मीमांसायां काव्यशास्त्रे च शब्दशक्तिः, विरूपाक्ष वि. जड्डीपाल, अमरग्रन्थपब्लिकेशन्स, दिल्ली, प्रथमसंस्करणम्, 2002
5. शब्दशक्तिप्रकाशिकासमीक्षणम्, डा. विष्णुपदमाहापात्रः, मान्यताप्रकाशनम्, मायापुरी, प्रथमसंस्करणम्, 2005
6. वैयाकरणानामन्येषाञ्च मतेन शब्दस्वरूपतच्छक्तिविचारः, डा.कालिकाप्रसाद-शुक्लः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, प्रथमसंस्करणम्, 2001
7. परमलघुमञ्जूषा, श्रीनागेशभट्टः, व्याख्याकारः – प्रो. बोधकुमारझाः, हंसाप्रकाशन, जयपुर, प्रथमसंस्करणम्, 2018
8. परमलघुमञ्जूषा, श्रीनागेशभट्टः, व्याख्याकारः – डा. जयशङ्करलालत्रिपाठी, चौखम्बाकृष्णदासअकादमी, वाराणसी, चतुर्थसंस्करणम्, 2011
9. तत्त्वचिन्तामणिः, श्रीगङ्गेशोपाध्यायः, सम्पादकः – श्रीमदुमेशमिश्रः, मिथिला-विद्यापीठः, प्रथमसंस्करणम्, 1957
10. शब्दशक्तिप्रकाशिका, श्रीजगदीशतर्कालङ्कारः, व्याख्याकारः – श्रीयोगगुरुचरण-देवशर्म्मा, कलिकाताविश्वविद्यालयः, कलिकाता, 1914
11. काव्यप्रकाशः, श्रीमम्मटाचार्य्यः, व्याख्याकारः – श्रीहरिशङ्करशर्म्मा, चौखम्भा-संस्कृतसंस्थानम्, वाराणसी, दशमसंस्करणम्, वि.2060



शोधच्छात्रा, व्याकरणविभागः,<br>
राष्ट्रियसंस्कृतसंस्थानम्,<br>
क.जे. सोमैयासंस्कृतविद्यापीठम्,<br>
विद्याविहारः (पू.), मुम्बई-400077 (महाराष्ट्रम्)


✦✦✦

Scanned with CamScanner

ISSN : 2321-6581
जुलाई - दिसम्बर - 2018
वर्ष : VI, अङ्क - II
कुल अङ्क - XI

# शोध नवनीत
# SHODH NAVNEET

(षाण्मासिकी अन्ताराष्ट्रिया शोध–पत्रिका)

The Half Yearly International Refereed Research Journal of Humanities and Oriental Knowledge

हमारा प्रयास समाजोपयोगी,
नवीन एवं प्राच्यज्ञान का प्रकाशन

"Our whole effort is to publish societal, innovative and oriental knowledge"

Impact Factor : 3.082
Reg. No. 1137/2013-2014
UGC Approved SL. No. 40890

स्तुति प्राच्यविद्या समिति, गोण्डा ( उ.प्र. )
STUTI PRACHYAVIDYA SAMITI, GONDA (U.P.)
अन्तर्जाल (Website) : www.shodhnavneet.com
अणुसंकेत (E-mail) : shodhnavneet@gmail.com
चलभाष (contact us) : +91-7800193920

Scanned with CamScanner

# विषयानुक्रमणिका

(CONTENTS)


- शिक्षक होने का अर्थ
  *प्रो. चाँदकिरण सलूजा* 1
- संस्कृतभाषा दक्षता संवर्धन में नवाचारों की भूमिका : एक पर्यालोचन
  *डॉ. आशुतोष पारीक* 5
- संहितासारवाङ्मय्या वेदादिशास्त्रदृष्ट्या परिशीलनम्
  *प्रो. आमोदवर्धनः कौण्डिन्न्यायनः* 11
- सामवेदवाङ्मय आचार्यान्तेवासिसम्बन्धमीमांसा
  *डॉ. श्रीरामोऽधिकारी* 17
- आर्षनायकयोश्चारित्र्यानुशीलनम्
  *ध्रुवप्रसादभट्टराईः* 25
- स्वप्नविषये आधुनिकमतस्योपरि वैदिकमतस्य प्रभावः
  *सुशोभनसॉंतरा* 30
- कामसूत्रोक्तकलानाम् उपयोगिता
  *राइचरणकामलः* 38
- गृहस्थाश्रमस्य कृते नित्यसम्पादनीयाः पञ्चमहायज्ञाः
  *डॉ. धनञ्जय वासुदेव द्विवेदी* 50
- वेदाङ्गेषु शिक्षाशास्त्रस्य वैशिष्ट्यम्
  *डॉ. गगनचन्द्रदे* 61
- ऋषिकविमुनिपुरोहितशब्दानां पर्यालोचनम्
  *रायवरपु. पवन् कुमारः* 71
- मनोनिग्रहे अष्टाङ्गयोगस्य महत्त्वम्
  *डॉ. सोमनाथ साहु* 76
- प्रश्नशिरोमणिग्रन्थे वर्णित आगमनप्रश्नः एकम् समीक्षणम्
  *डॉ. आशिषः जे* 83
- नागेशरीत्या तार्किकभूषणकृतोर्मतनिरसनपूर्वकः शक्तिविमर्शः
  *सुश्री विदुषी बोल्ला* 87
- कल्किपुराणे मोक्षस्य अवधारणा
  *तरणीकुमारपण्डा* 95




Scanned with CamScanner

Shodh Navneet (International Refereed Research Journal)
ISSN : 2321-6581, Impact Factor : 3.082, Vol. XI, July - Dec. - 2018

# नागेशरीत्या तार्किकभूषणकृतोर्मतनिरसनपूर्वकः शक्तिविमर्शः

सुश्री विदुषी बोल्ला*

**प्रस्तावना** – शाब्दबोधाय वृत्तिज्ञानमावश्यकम्। तत्र शाब्दिकमते तु वृत्तिर्द्विधा, शक्तिः व्यञ्जना च। शक्तेः ग्राहकाणितावत् – '**शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च। वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः**' इत्यभियुक्तोक्त्या व्याकरणादीनि। व्याकरणाद्यथा- '**दक्षस्यापत्यं दाक्षिः**'[१] इत्यत्र दाक्षिपदस्य दक्षापत्ये शक्तिग्रहः, '**अश्व इव प्रतिकृतिर्यस्य सः अश्वकः**'[२] इत्यत्र अश्वकपदस्य गर्दभे शक्तिः। उपमानाद्यथा – '**गोसदृशो गवयः**' इति श्रुतस्य वने तथाकृतियुक्तपशुदर्शनात् गवयोऽयमिति ज्ञानम्। कोशाद्यथा – 'शम्भुरीशः पशुपतिरि'त्यादि। आप्तवाक्याद्यथा – अयमश्वपदवाच्यः इति। व्यवहाराद्यथा – 'अश्वमानय' इति श्रुते आनीतं पशुं दृष्ट्वा अश्वोऽयमिति ज्ञानम्। वाक्यशेषाद्यथा – 'यवमयश्चरुर्भवति' इत्यत्र यवशव्दस्य आर्य्यव्यवहारमनुसृत्य दीर्घशूकस्य, म्लेच्छव्यवहारमनुसृत्य कङ्गोश्च सन्देहे –

**वसन्ते सर्वसस्यानां जायते पत्रशातनम्।**
**मोदमानाश्च तिष्ठन्ति यवाः कणिशशालिनः।।**

इति वाक्याद् दीर्घशूकस्यैव ज्ञानं भवति। विवृतिर्विवरणं, तस्माद्यथा – 'गौः सास्नादिमत्पिण्डमि'ति विवरणात्सास्नादिमत्पिण्डस्य गोपदवाच्यताज्ञानम्, यद्वा 'हरिर्वासुदेवः' इत्यत्र नानार्थकस्य हरिपदस्य वासुदेवेऽर्थे शक्तिग्रहः। सिद्धपदस्य सान्निध्याद्यथा – 'कमले मधुकरः पिवति मधु' इत्यादौ कमलपदसान्निध्यान्मधुकरपदस्य भ्रमरे शक्तिः, मधुपदस्य पुष्परसपदे च।

**शक्तिविषये तार्किकमतम्** – तत्र प्रथमं प्राचीननैयायिकाः एवं ब्रूवते – '**अस्माच्छब्दादयमर्थो बोद्धव्यः**' इति अर्थविशेष्यिका पदप्रकारिका, 'इदं पदमिममर्थं बोधयतु' इति पदविशेष्यिकाऽर्थप्रकारिका ईश्वरेच्छा शक्तिः। एवञ्चोक्ता ईश्वरेच्छारूपा शक्तिरेव सम्बन्धोऽपि वर्त्तते। आधुनिकसङ्केतेष्वपि 'एकादशेऽह्नि पिता नाम कुर्य्यात्' इति श्रुतिवचनेन ईश्वरेच्छा भवत्येव। अस्मदादिषु अपभ्रंशेषु नामसु शक्तिग्रहस्तु शक्तिभ्रमेण लक्षणया वा जायते।

नव्यनैयायिकास्तु इच्छा एव शक्तिरिति मन्यन्ते। तेन आधुनिकसङ्केतेष्वपि प्रयोगकर्त्तुः इच्छासत्त्वात् शक्तिर्भवत्येव, लक्षणायाः आवश्यकता न स्यादिति लाघवम्। ईश्वरेच्छारूपायाः इच्छारूपायाः वा शक्तेः विषयतारूपः सम्बन्धः यद्यपि त्रिषु विषयेषु– पदे, अर्थे, शाब्दबोधे च विद्यते, तथा च विषयतासम्बन्धेन शक्तिमत्त्वं वाचकत्त्वम् अथवा वाच्यत्वमिति लक्षणेन अतिव्याप्तिदोषः स्यात्, तस्माद्-बोधनिष्ठजन्यतानिरूपितजनकतावत्त्वेन शक्तिविषयो वाचकः,[३] पदजन्यबोधविषयत्वेन शक्तिविषयो वाच्यः[४]

* शोधच्छात्रा, व्याकरणविभागः, राष्ट्रियसंस्कृतसंस्थानम्, क. जे. सोमैयासंस्कृतविद्यापीठम्, विद्याविहारः (पू.), मुम्बई, महाराष्ट्रम्



Scanned with CamScanner

इति बोध्यम्।

**तार्किकमतखण्डनम्** – तार्किकोक्ता ईश्वरेच्छारूपा शक्तिः न भवितुम् अर्हति। यतो हि यः पदपदार्थयोः सम्बन्धो भवेत्, सः एव शक्तिपदेन उच्येत। इच्छायाः सम्बन्धत्वाभावेन शक्तित्वाभावः। 'सम्बन्धो हि सम्बन्धिद्वयभिन्नत्वे सति द्विष्ठत्वे च सति आश्रयतया विशिष्टबुद्धिनियामकः।'[५] तथा च यः सम्बन्धिनोः आश्रयतायाः नियामकः, स एव सम्बन्धः कथ्यते। अत्र तु सम्बन्धिनौ पदपदार्थौ, तौ न इच्छायाः आश्रयौ, चेतने आत्मनि एव इच्छायाः आश्रयतासम्भवात्। अत एव घटशब्द इच्छावान्, तदर्थो वा इच्छावान् इति न व्यवहारः।

**वैयाकरणमतम्** – तत्रादौ कौण्डभट्टमतन्तन्निरसनञ्च प्रदर्श्यते – वैयाकरणभूषणसारे वाक्यपदीयकारिकया शक्तिस्वरूपमाह –

> **इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा।**
> **अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा।।**

इन्द्रियाणामित्यत्र निष्ठत्वं षष्ठ्यर्थः। स्वविषयेष्वित्यत्र निरूपितत्वं सप्तम्यर्थः। योग्यता कारणता। तथा चेन्द्रियनिष्ठा इन्द्रियविषयघटादिनिरूपिता या कारणता सा यथा अनादिस्तथा सकलशब्दनिष्ठा घटादिनिरूपिता योग्यताऽपि अनादिः। एवञ्च घटादिविषयकचाक्षुषादिज्ञाननिरूपिता योग्यता इन्द्रियनिष्ठा यथाऽनादिस्तथा शब्दनिष्ठा अर्थविषयकज्ञाननिरूपिता योग्यताऽप्यनादिः। इयञ्च योग्यतारूपा शक्तिः पदार्थान्तरम्। बोधजनकत्वं शक्तिरिति भूषणकाराभिमतं मतम्। किन्तु बोधजनकत्वं शक्तिः अपि सम्बन्धो भवितुं नार्हति, पदे वृत्तितानियामकेन स्वरूपसम्बन्धेन स्थिता अपि पदार्थे तु वृत्तिताऽनियामकेन निरूपकतासम्बन्धेन तस्याः स्थितत्वात्।

**मञ्जूषाकृन्मतम्** – भट्टनागेशमते पदपदार्थयोः सम्बन्धान्तरमेव शक्तिः, तस्याः शक्तेः नाम वाच्यवाचकभावोऽस्ति। अस्याः शक्तेः बोधकः तादात्म्यसम्बन्धः[६], तादात्म्यस्य च इतरेतराध्यासो वर्तते। पदार्थनिरूपिततादात्म्यवत् पदम्, पदनिरूपिततादात्म्यवान् अर्थः इति व्यवहारे प्रसिद्धत्वात् तादात्म्यस्य द्विष्ठत्वात्[७] सम्बन्धत्वमुपपन्नम्। शक्त्या शाब्दबोधजननाय सम्बन्धः एव नियामको भवति। यथा दीपकादौ विद्यमाना प्रकाशिका शक्तिः वस्तु तावन्न प्रकाशयितुं प्रभवति यावत् प्रकाशस्य घटादिविषयस्य च संयोगसम्बन्धो न स्यात्। तस्मादेव प्रकाशेन सम्बद्धस्यैव घटादेः प्रकाशो भवति नासम्बद्धस्य।

| **प्रकाशकः** | **शक्तिः** | **प्रकाशः** | **विषयः** | **सम्बन्धः** | **फलम्** |
|---|---|---|---|---|---|
| दीपकः | प्रकाशकता | आलोकः | घटः | संयोगः | घटप्रकाशनम् |
| पदम् | वाच्यवाचकभावः | वाचकः (पदम्) | वाच्यः (अर्थः) | तादात्म्यम् | बोधः |

तथा च वाच्यवाचकभावरूपशक्तेः ज्ञानं तादात्म्यसम्बन्धेन भवति, तादात्म्यस्य च ज्ञानं शब्दार्थयोः परस्पराध्यासेन।

**शक्तिभेदः** – इयञ्च शक्तिः त्रिविधा – रूढिशक्तिः, योगशक्तिः, योगरूढिशक्तिश्च। तत्रादौ –

**रूढिशक्तिः**[८] – कल्पितप्रकृतिप्रत्ययार्थबोधकत्वासमानाधिकरणा या किञ्चिदर्थनिरूपिता शक्तिः सा रूढिरित्युच्यते। मणिनूपुरशब्दौ शब्दकर्तृरूपार्थं स्तुतिसम्बन्ध्यग्रगमनकर्तारं वा न बोधयतः, अपितु रत्नमाभूषणविशेषं वेति रूढिशक्तिमत्त्वमनयोः। तथाहि समुदायार्थमात्रबोधकपदे शक्तिः रूढिः।

**योगशक्तिः**[९] – अवयवार्थमात्रबोधकपदे शक्तिः योगः। यथा पाचक इत्यादौ।

Scanned with CamScanner

**योगरूढिशक्तिः**[10] – यत्रावयवशक्तिसमानाधिकरणा च समुदायशक्तिस्तत्र योगरूढिशक्तिः। यथा पङ्कजादिपदे प्रकृतिप्रत्ययार्थपङ्कजनिकर्तृत्वशक्तिसमानाधिकरणा पद्मेतिसमुदायशक्तिः, तस्माद्योगरूढि शक्तिमत्वमस्य। क्वचित् योगरूढशब्देषु तात्पर्य्यग्राहकानुसारं रूढ्यर्थमात्रस्य योगार्थमात्रस्य वा बोधो भवति। यथा 'भूमौ पङ्कजम् उत्पन्नम्' इत्यत्र पङ्कजपदात् स्थलकमलम् इति रूढ्यर्थस्य एव भूमिपदसन्निधानात् बोधः, न तु पङ्कजनिकर्तृरूपस्य योगार्थस्य।

**शक्तिनियामकाः** – नानार्थकशब्देषु वाच्यवाचकभावरूपा नाना शक्तिः भवति, सा संयोगविप्रयोगादिभिः शक्तिनियामकैः क्वचित् एकत्र अर्थे निश्चीयते। ते शक्तिनियामकास्तु –

**संयोगो विप्रयोगश्च साहचर्य्यं विरोधिता।**
**अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः।।**
**सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः।**
**शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः।।** (वाक्यपदीयम्)

भर्तृहरेः कारिकायामस्यां नाम्ना चतुर्दश शक्तिनियामकाः उक्ताः, तेषाञ्च क्रमशः उदाहरणानि प्रस्तूयन्ते –

**संयोगः** – प्रसिद्धसंयोगसम्बन्धः इति, अस्योदाहरणम् – 'सवत्सा धेनुरि'त्यत्र वत्सस्य संयोगसम्बन्धज्ञानेन धेनुपदस्य गौः इत्यर्थे तात्पर्य्यनिर्णयः।

**विप्रयोगः** – प्रसिद्धसंयोगसम्बन्धस्य विच्छेदः इति, अस्योदाहरणम् – 'अवत्सा धेनुरि'त्यस्य वत्ससंयोगरहिता गौः इत्यर्थः। प्राप्तौ सत्यां निषेधः इति नियमात् यत्र प्राप्तिः तत्रैव निषेधः जायते। वत्ससंयोगेन गवि एव धेनु तात्पर्य्ये प्राप्ते अवत्सापदेन तादृशधेनोः अर्थात् गोः एव निषेधः, न महिष्यादेः। अत्र वत्सविप्रयोगज्ञानेन धेनुपदस्य गौः इत्यर्थे तात्पर्य्यावधारणम्।

**साहचर्य्यम्** – सदृशस्य युगपत् प्रयोगः इति, अस्योदाहरणन्तु 'रामलक्ष्मणौ' इत्यत्र रामसाहचर्य्यात् दशरथापत्यलक्ष्मणः, लक्ष्मणसाहचर्य्याच्च दशरथापत्यरामः गृह्यते। एवञ्च परशुरामबलराम दाशरथिप्रभृतिनानार्थवाचकस्य रामशब्दस्य सारसदुर्योधनपुत्रदाशरथिप्रभृतिनानार्थवाचकस्य लक्ष्मणशब्दस्य च परस्परसाहचर्य्येण दाशरथिरूपे अर्थे शक्तिः निश्चीयते।

**विरोधिता** – विरोधिभावः इत्यर्थः, अस्योदाहरणम् – 'रामार्जुनगतिस्तयोः' इत्युदाहरणम्। परस्परविरोधकारणात् परशुरामदाशरथ्यादिवाचकस्य रामस्य कार्त्तवीर्य्यसहस्रार्जुनपाण्डवार्जुनवाचकस्य अर्जुनस्य क्रमशः परशुरामे सहस्रार्जुने च शक्तिः नियम्यते।

**अर्थः** – प्रयोजनम्, अनन्यथासाध्यफलमित्यर्थः, अस्योदाहरणम् – 'अञ्जलिना जुहोति', 'अञ्जलिना सूर्य्यमुपतिष्ठते' इति । एकहस्ताञ्जलि-वाचकस्य, हस्तद्वयाञ्जलिवाचकस्य च अञ्जनिशब्दस्य अञ्जलिना जुहोति (हवनं कुर्य्यात्। इत्यत्र हवनरूपस्य अर्थस्य प्रयोजनस्य कारणात् एकहस्ताञ्जलिवाच्ये शक्तिः, अञ्जलिना सूर्य्यमुपतिष्ठते (सूर्य्योपस्थापनं कुर्य्यात्) इत्यत्र सूर्य्योपस्थापनरूपप्रयोजनबलात् हस्तद्वयाञ्जलिवाच्ये शक्तिः निश्चीयते।

**प्रकरणम्** – वक्तृश्रोतृबुद्धिविषयतेत्यर्थः, अस्योदाहरणम् – 'सैन्धवमानयेत्यादिः।' लवणबोधकाश्वबोधकसैन्धवशब्दस्य भोजनज्ञानरूपे प्रकरणे लवणार्थे यात्राज्ञानप्रकरणे अश्वार्थे च शक्तिः अवधार्य्यते।

Scanned with CamScanner

**लिङ्गम्** – लीनमर्थङ्गमयति यत् तल्लिङ्गमर्थाज्ञापकमित्यर्थः, अस्योदाहरणम् – 'अक्ताः शर्कराः उपदधाती'ति। अञ्जनञ्च आर्द्रीकरणद्रव्यम् घृततैलादिकम्। शर्कराः इष्टिकाचूर्णानि। उपदधाति अग्न्याधानार्थं वेद्यां परिस्थापयेत्। तथाहि अक्ताः इत्यादिवाक्यस्य अञ्जनविशिष्टेष्टिकाचूर्णानि अग्न्याधानार्थं वेद्यां स्थापयेदित्यर्थः। अत्र वाक्ये अक्तपदार्थघटकेन अञ्जनशब्देन घृतेन, तैलेन अथवा जलेन केन आर्द्रीकरणीयमिति विशेषनिर्देशाभावः। तथापि तद्वाक्यसमीपे तेजो वै घृतमिति घृतस्तुतिवाक्यप्रयुक्तत्वात् यः स्तूयते स विधीयते इति मीमांसाशास्त्रीयन्यायेन घृतेसाधकाञ्जने शक्तिः विधीयते।

**अन्यस्य शब्दस्य सन्निधिः** – एकार्थमात्रवाचकपदसमीपोच्चारणमित्यर्थः, अस्योदाहरणम् - 'रामो जामदग्न्यः' इति । परशुरामबलरामदाशरथ्यादिवाचकस्य रामशब्दस्य जामदग्न्यपदसन्निधानात् जमदग्नेः अपत्यम् परशुरामार्थे शक्तिः अवधार्य्यते।

**सामर्थ्यम्** – अचरितार्थशब्दार्थशक्तिः कारणता वेत्यर्थः, अस्योदाहरणम् – 'अभिरूपाय कन्या देया' इति। अभिरूपः अर्थात् सुन्दरः। कन्या अभिरूपाय सुन्दराय एव दीयते, पुनरपि अभिरूपाय इत्युक्ते सामर्थ्यात् विशेषणपदप्रयोगस्य सार्थक्यात् अभिरूपपदस्य अभिरूपतरे अतिशयसुन्दररूपवति इत्यर्थे शक्तिः लभ्यते।

**औचिती** – औचित्यम्, योग्यता चार्थः, अस्योदाहरणम् –

> **यश्च निम्बं परशुना यश्चैनं मधुसर्पिषा।**
> **यश्चैनं गन्धमाल्याद्यैः सर्वस्य कटुरेव सः।।**

**श्लोकार्थस्तु** – निम्बं यः परशुना, यः मधुसर्पिषा, यश्च गन्धमाल्याद्यैः छिन्द्यात्, सिञ्चेत्, पूजयेच्च, तस्य तस्य सर्वस्य कृते सः निम्बः कटुः अर्थात् तिक्तस्वादवान् एव भवति। श्लोकेऽस्मिन् क्रियापदाभावेऽपि औचित्यात् योग्यत्वात् परशुरूपकरणस्य छेदनार्थत्वप्रतीतेः छिन्द्यात् पदम्, मधुसर्पिःकरणस्य सेचनार्थत्वप्रतीतेः सिञ्चेदिति पदम्, गन्धमाल्यादिकरणस्य पूजनार्थत्वप्रतीतेः पूजयेदिति च पदमध्याह्रियते।

**देशः** – स्थानमित्यर्थः, 'भात्यत्र परमेश्वरः' इत्युदाहरणम्। अत्र राजधानीदेशे परमेश्वरपदस्य राजेत्यर्थे शक्तिः निर्धार्य्यते।

**कालः** – समयः इत्यर्थः, 'चित्रभानुर्भाती'त्युदाहरणम् । अग्नेः सूर्य्यस्य वाचकं चित्रभानुपदम्। अत्र अर्थसन्देहे कालेन निर्णयो भवति। यदि रात्रौ वाक्यप्रयोगः, तदा अग्निरूपार्थस्य, यदि च दिने वाक्यप्रयोगः, तदा सूर्य्यरूपार्थस्य निश्चयो भवति।

**व्यक्तिः** – लिङ्गम् स्त्रीत्वपुंस्त्वाद्यर्थः, अस्योदाहरणम् – 'मित्रो भाति', 'मित्रं भाती'ति। अत्र पुँल्लिङ्गनिर्देशात् सूर्य्यवाचकस्य, क्लीबलिङ्गनिर्देशात् सुहृद्वाचकस्य शक्तित्वमवधार्य्यते।

**स्वरः** – उदात्तादयः, उदाहरणन्तु – 'स्थूलपृषतीमनड्वाहीमालभेत' इति याज्ञिकैः उच्यते, अत्र स्थूला चासौ पृषती (पृषदिति शब्दः बिन्दुवाचकः) इति कर्म्मधारयसमासे पृषत् इति शब्दस्य मत्वर्थे लक्षणया पृषत्वती (बिन्दुमती) अर्थः भवति। तथाहि कर्म्मधारयपक्षे बिन्दुमती गौः एवाभिधीयते। स्थूलाऽपि गौः एव। बिन्दूनां स्थौल्यं कृशत्वं वेत्यत्र न आग्रहः। बहुव्रीहिसमासपक्षे च स्थूलानि पृषन्ति यस्याः सा इति विग्रहे स्थौल्यं तु पृषत्सु एव। गौः स्थूला कृशा वेत्यत्र न आग्रहः। तत्र स्थूलपृषतीम् इत्यत्र कर्म्मधारयः बहुव्रीहिः वेति सन्देहे वैयाकरणः स्वरेण निश्चिनोति। तत्त्र स्थूलशब्दस्य लकाराकारस्य उदात्तत्वं दृष्ट्वा पूर्व्वपदप्रकृतिस्वरेण[११] बहुव्रीहिः निश्चीयते, अपि च पृषतीत्यस्य ईकारेऽन्तोदात्तत्वं[१२] दृष्ट्वा कर्म्मधारयः

निश्चीयते। कर्म्मधारयपक्षे बिन्दुमती स्थूला गौः इत्यर्थः, अत्र स्थूलशब्दः गवि विशेषणम्। बहुव्रीहिपक्षे स्थूलबिन्दुमती गौः इत्यर्थः, अत्र स्थूलशब्दः बिन्दौ विशेषणम्। प्रकृतोदाहरणे पूर्व्वपदप्रकृतिस्वरेण लकाराकारस्य उदात्तत्वात् बहुव्रीह्यर्थस्य निर्धारणम्।

**आदिशब्देन ग्राह्याः** – श्लोके आदिपदेन षत्व-सत्व-णत्व-नत्वादयः गृह्यन्ते।

**(१) षत्व-सत्वयोरुदाहरणम्** – सुषिक्तम्, सुसिक्तमिति। अत्र निन्दार्थद्योत्ये 'सुः पूजायाम्'[१३]इत्यनेन कर्म्मप्रवचनीयसञ्ज्ञाभावे 'उपसर्गात् सुनोति'[१४] इत्यनेन सूत्रेण षत्वं विधीयते, तथा चसुषिक्तमित्यत्र मूर्धन्यषकारनिर्देशात् निन्दार्थप्रतीतिर्भवति। एवञ्च सुसिक्तमित्यत्र दन्त्यसकारनिर्देशात् पूजार्थः प्रतीयते।

**(२) णत्व-नत्वयोरुदाहरणम्** – प्रणायकः, प्रनायकः इति। प्रणायकः इत्यत्र नयनक्रियायोगे उपसर्गसञ्ज्ञायाम् 'उपसर्गादसमासेऽपि'[१५] इत्यनेन णत्वं विधीयते, तेनणत्वदर्शनेन प्रकृष्टनयनकर्तृरूपेऽर्थे शक्तिः निर्णीयते। प्रनायकः इत्यत्र णत्वाभावात् प्रशब्दस्य क्रियायोगाभावात् प्रगतो नायको यस्मात् स देशः इत्यर्थे शक्तिः निश्चीयते ।

**शक्यशक्तविवेकः** – पदपदार्थयोः इतरेतराध्यासमूलकस्य तादात्म्यसम्बन्धस्य योऽर्थः निरूपकरूपेण (निरूपकतासम्बन्धेन) वक्तुमभीप्सितः भवति, सः शक्यः इत्युच्यते। अथ च यः शब्दः तादात्म्यसम्बन्धस्य आश्रयरूपेण (आश्रयतासम्बन्धेन) वक्तुम् ईप्सितः भवति, सः शक्तः इति नाम्ना उच्यते। तथाहि तादात्म्यरूपसम्बन्धः निरूपकतासम्बन्धेन अर्थे, एवम् आश्रयतासम्बन्धेन शब्दे तिष्ठति। तदेवोक्तम् – तस्य च तादात्म्यस्य निरूपकत्वेन विवक्षितोऽर्थः शक्यः, आश्रयत्वेन विवक्षितः शब्दः शक्तः इत्युच्यते।[१६]

**वस्तुतस्तुशक्यः** अर्थः बौद्धः, अपि च, शक्तं पदं स्फोटस्वरूपं बौद्धम्, तयोः तादात्म्यम् अर्थात् तादात्म्यञ्च तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वमिति भेदाभेदसमनियतम् अर्थात् द्वयोः पदार्थयोः वस्तुतः भेदो भवेत्, आरोपितश्च अभेदो भवेत्, तर्हि तयोः पदार्थयोः भासमानो धर्म्मः तादात्म्यमिति उच्यते। अत्र भेदः वास्तविको भवति, अभेदश्च आरोपितो भवति, तस्मात् तयोः वास्तविकस्य आरोपितस्य च सहस्थितौ न दोषः। यदि द्वयं वास्तविकं स्यात्, तर्हि अन्धकारस्य प्रकाशस्य इव सहस्थितिः न स्यात्। नैयायिकानां तादात्म्यम् अभेदरूपं भवति, अस्माकं वैयाकरणानां शब्दार्थतादात्म्यं भेदाभेदरूपं भवति। अयमस्ति उभयोः भेदः। एवञ्च बौद्धार्थस्य शक्यत्वेन, स्फोटात्मकपदस्य शक्तत्वेन स्वीकारे एव वह्निशब्दोच्चारणे सति मुखे न दाहापत्तिः, बौद्धे वह्न्यादौ अर्थे दाहादिशक्त्याभावात्। बौद्धार्थे बाह्यार्थदाहादिः न भवतीति प्रतिपाद्यते न्यायदर्शनस्य विकल्पविषयकसूत्रेण – 'शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः' अस्यार्थस्तु शब्दद्वारा उत्पन्नज्ञानात् अनन्तरं बाह्यार्थरहितः अर्थः बुद्ध्या परिकल्पितः अनुपतति बुद्धौ पश्चाद् भवति इति। व्याकरणप्रक्रियार्थमपि बौद्धार्थस्यावश्यकत्वमस्ति –

**एष वन्ध्यासुतो याति खपुष्पकृतशेखरः।**
**कूर्म्मक्षीरचये स्नातः शशशृङ्गधनुर्धरः।।**

अत्र बाह्यार्थात् अतिरिक्तस्य बौद्धार्थस्य स्वीकारात् एव बाह्यार्थरूपार्थवत्त्वस्य यत्र वन्ध्यासुत-खपुष्प-कूर्म्मक्षीर-शशशृङ्गशब्देषु अभावसत्त्वेऽपि बौद्धार्थेन अर्थवत्त्वं मत्वा प्रातिपदिकसञ्ज्ञा, तदुत्तरं स्वादिप्रत्ययश्च भवति।

**निष्कर्षः** – शब्दादागतः शाब्दः, 'तत आगत'[१७] इत्यनेन अण्। अण्प्रत्ययार्थः प्रयोज्यत्वम्। तथा च

Scanned with CamScanner

शब्दप्रयोज्यो बोधः शाब्दबोधो भवति। सर्वैः शब्दैः निखिलार्थबोधो न जायते। तस्माच्छब्देनार्थबोधाय वृत्तिज्ञानं कारणभूतम्। वृत्तिस्तु ज्ञाता सती शाब्दबोधं प्रति कारणत्वं वहते, न स्वरूपसती। अज्ञातवृत्तिकस्य शाब्दबोधादर्शनात्। वैयाकरणैरत्र पदपदार्थयोर्वृत्त्याख्यसम्बन्धः शक्तिलक्षणाऽन्यतररूपः इति मन्यते। अत्र नैयायिकमते – ईश्वरेच्छा शक्तिः, सा च अस्मात् पदात् अयमर्थो बोद्धव्यः, इदं पदमिममर्थं बोधयतु इत्याकारिका। इच्छायाः सम्बन्धत्वाभावेन शक्तित्वाभावः। 'सम्बन्धो हि सम्बन्धिद्वयभिन्नत्वे सति द्विष्ठत्वे च सति आश्रयतया विशिष्टबुद्धिनियामकः'।[१८] तथा च यः सम्बन्धिनोः आश्रयतायाः नियामकः, स एव सम्बन्धः कथ्यते। अत्र तु सम्बन्धिनौ पदपदार्थौ, तौ न इच्छायाः आश्रयौ, चेतने आत्मनि एव इच्छायाः आश्रयतासम्भवात्। अत एव घटशब्द इच्छावान्, तदर्थो वा इच्छावान् इति व्यवहारोऽपि न स्यात्। बोधजनकत्वं शक्तिरिति भूषणकाराभिमतं मतम्। किन्तु बोधजनकत्वं शक्तिः अपि सम्बन्धो भवितुं नार्हति, पदे वृत्तितानियामकेन स्वरूपसम्बन्धेन स्थिता अपि पदार्थे तु वृत्तिताऽनियामकेन नियामकतासम्बन्धेन तस्याः स्थितत्वात्। भट्टनागेशमते पदपदार्थयोः सम्बन्धान्तरमेव शक्तिः, तस्याः शक्तेः नाम वाच्यवाचकभावोऽस्ति। अस्याः शक्तेः बोधकः तादात्म्यसम्बन्धः[१९], तादात्म्यस्य च इतरेतराध्यासो वर्तते। पदार्थनिरूपिततादात्म्यवत् पदम्, पदनिरूपिततादात्म्यवान् अर्थः इति व्यवहारे प्रसिद्धत्वात् तादात्म्यस्य द्विष्ठत्वात्[२०] सम्बन्धत्वमुपपन्नम्। अत्र तादात्म्यस्य निरूपकत्वेन विवक्षितोऽर्थः शक्यः, आश्रयत्वेन च विवक्षितः शब्दः शक्तः इत्युच्यते। वस्तुतो बौद्ध एवार्थः शक्यः, पदमपि स्फोटात्मकं प्रसिद्धम्, तयोस्तादात्म्यम्। इयञ्च शक्तिः त्रिविधा – रूढिशक्तिः, योगशक्तिः, योगरूढिशक्तिश्च।

**रूढिशक्तिः**[२१] – कल्पितप्रकृतिप्रत्ययार्थबोधकत्वासमानाधिकरणा या किञ्चिदर्थनिरूपिता शक्तिः सा रूढिरित्युच्यते। यथा – मणिनूपुरशब्दौ।

**योगशक्तिः**[२२] – अवयवार्थमात्रबोधकपदे शक्तिः योगः। यथा पाचक इत्यादौ।

**योगरूढिशक्तिः**[२३] – यत्रावयवशक्तिसमानाधिकरणा च समुदायशक्तिस्तत्र योगरूढिशक्तिः। यथा पङ्कजादिपदे।

नानार्थकशब्देषु वाच्यवाचकभावरूपा नाना शक्तिः भवति, सा संयोगविप्रयोगादिभिः शक्तिनियामकैः क्वचित् एकत्र अर्थे निश्चीयते। ते शक्तिनियामकास्तु – संयोगः, विप्रयोगः, साहचर्य्यं, विरोधिता, अर्थः, प्रकरणं, लिङ्गं, अन्यस्य शब्दस्य सन्निधिः, सामर्थ्यम्, औचिती, देशः, कालः, व्यक्तिः, स्वरादयश्च।

## सन्दर्भाः


१. 'अत इञ्' (४-१-९५) इत्यनेन अपत्यार्थे इञ्प्रत्यये दाक्षिरिति। पा. अ., पृ. सं.- ३१, मन्त्रीरामलालकपूरट्रस्ट, सोनीपत, सप्तदशसंस्करणम्, २००५

२. 'इवे प्रतिकृतौ' (५-३-९६) इत्यनेन कन्। पा. अ. पृ. सं.- ५१, तदेव।

३. परमलघुमञ्जूषा, पृ. सं.- १८६, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, २०१८

४. परमलघुमञ्जूषा, पृ. सं.- १८६, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, २०१८

५. परमलघुमञ्जूषा, पृ. सं.- १९०, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, २०१८

६. 'तादात्म्यञ्च तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वमिति भेदाभेदसमनियतम्', परमलघुमञ्जूषा, पृ. सं.- २१२, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, २०१८

७. 'सम्बन्धो हि सम्बन्धिद्वयभिन्नत्वे सति द्विष्ठत्वे च सति आश्रयतया विशिष्टबुद्धिनियामकः' परमलघुमञ्जूषा, पृ. सं.- १९०, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, २०१८


Scanned with CamScanner

८. 'शास्त्रकल्पिकावयवार्थभानाभावे समुदायार्थनरूपितशक्ती रूढिः', परमलघुमञ्जूषा, पृ. सं.- २३५, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, २०१८

९. 'शास्त्रकल्पितावयवार्थनिरूपिता शक्तिर्योगः' परमलघुमञ्जूषा, पृ. सं.- २३५, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, २०१८

१०. 'शास्त्रकल्पितावयवार्थान्वितविशेष्यभूतार्थनिरूपिता शक्तिर्योगरूढिः', परमलघुमञ्जूषा, पृ. सं.- २३५, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, २०१८

११. 'बहुव्रीहौ प्रकृत्या पूर्वपदम्' पा. अ. ६.२.१, पृ. सं.- , मन्त्रीरामलालकपूरट्रस्ट, सोनीपत, सप्तदशसंस्करणम्, २००५

१२. 'समासस्य' पा. अ. ६.१.२२३, पृ. सं.- , मन्त्रीरामलालकपूरट्रस्ट, सोनीपत, सप्तदशसंस्करणम्, २००५

१३. पा. अ. १.४.१४, पृ. सं.- , मन्त्रीरामलालकपूरट्रस्ट, सोनीपत, सप्तदशसंस्करणम्, २००५

१४. पा. अ. ८.३.६५, पृ. सं.- , मन्त्रीरामलालकपूरट्रस्ट, सोनीपत, सप्तदशसंस्करणम्, २००५

१५. पा. अ. ८.४.१४, पृ. सं.- , मन्त्रीरामलालकपूरट्रस्ट, सोनीपत, सप्तदशसंस्करणम्, २००५

१६. परमलघुमञ्जूषा, पृ. सं.- २०८, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, २०१८

१७. पा. अ. ४.३.७४, पृ. सं.- ३८, मन्त्रीरामलालकपूरट्रस्ट, सोनीपत, सप्तदशसंस्करणम्, २००५

१८. परमलघुमञ्जूषा, पृ. सं.- १९०, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, २०१८

१९. 'तादात्म्यञ्च तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वमिति भेदाभेदसमनियतम्', परमलघुमञ्जूषा, पृ. सं.- २१२, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, २०१८

२०. 'सम्बन्धो हि सम्बन्धिद्वयभिन्नत्वे सति द्विष्ठत्वे च सति आश्रयतया विशिष्टबुद्धिनियामकः', परमलघुमञ्जूषा, पृ. सं.- १९०, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, २०१८

२१. 'शास्त्रकल्पिकावयवार्थभानाभावे समुदायार्थनरूपितशक्ती रूढिः', परमलघुमञ्जूषा, पृ. सं.- २३५, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, २०१८

२२. 'शास्त्रकल्पितावयवार्थनिरूपिता शक्तिर्योगः', परमलघुमञ्जूषा, पृ. सं.- २३५, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, २०१८

२३. 'शास्त्रकल्पितावयवार्थान्वितविशेष्यभूतार्थनिरूपिता शक्तिर्योगरूढिः' परमलघुमञ्जूषा, पृ. सं.- २३५, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, २०१८

## सहायकग्रन्थसूची


- साहित्यदर्पणः, श्रीविश्वनाथाचार्य्यः, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी, प्रथमसंस्करणम्, २०१३
- काव्यप्रकाश, मम्मट, (बालबोधिनीटीका), व्या. वामनाचार्यझलकीकरः, परिमलपब्लिकेशन्स, दिल्ली, २००८
- काव्यप्रकाशः, श्रीमम्मटाचार्यः, सम्पादकः - डॉ. नरेन्द्रः, ज्ञानमण्डललिमिटेड, वाराणसी, षष्ठसंस्करणम्, २०१०
- प्रौढनिबन्धसौरभम्, आचार्यविश्वनाथमिश्रः, राष्ट्रियसंस्कृतसाहित्यकेन्द्रम्, जयपुरम्, प्रथमसंस्करणम्, २००३
- मीमांसायां काव्यशास्त्रे च शब्दशक्तिः, विरूपाक्ष वि. जड्डीपाल्, अमरग्रन्थपब्लिकेशन्स, दिल्ली, प्रथमसंस्करणम्, २००२


Scanned with CamScanner

- शब्दशक्तिप्रकाशिकासमीक्षणम्, डॉ. विष्णुपदमहापात्रः, मान्यताप्रकाशनम्, मायापुरी, प्रथमसंस्करणम्, २००५
- वैयाकरणानामन्येषाञ्चमतेनशब्दस्वरूपतच्छक्तिविचारः, डॉ. कालिकाप्रसादशुक्लः, सम्पूर्णानन्द संस्कृतविश्वविद्यालयः, वाराणसी, प्रथमसंस्करणम्, २००१
- परमलघुमञ्जूषा, श्रीनागेशभट्टः, व्याख्याकारः - प्रो. बोधकुमारझा, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, २०१८
- परमलघुमञ्जूषा, श्रीनागेशभट्टः, व्याख्याकारः - डॉ. जयशङ्करलालत्रिपाठी, चौखम्बाकृष्णदास-अकादमी, वाराणसी, चतुर्थसंस्करणम्, २०११
- तत्त्वचिन्तामणिः, श्रीगङ्गेशोपाध्यायः, सम्पादकः - श्रीमदुमेशमिश्रः, मिथिलाविद्यापीठः, प्रथमसंस्करणम्, १९५७
- शब्दशक्तिप्रकाशिका, श्रीजगदीशतर्कालङ्कारः, व्याख्याकारः - श्रीयोगगुरुचरणदेवशर्म्मा, कलिकाताविश्वविद्यालयः, कलिकाता, १९१४
- काव्यप्रकाशः, श्रीमम्मटाचार्य्यः, व्याख्याकारः - श्रीहरिशङ्करशर्म्मा, चौखम्भासंस्कृतसंस्थानम्, वाराणसी, दशमसंस्करणम्, वि. सं. २०६०


Scanned with CamScanner

ISSN : 2321-6581
जनवरी - जून - 2019
वर्ष : VII, अङ्क - I
कुल अङ्क - XII
खण्ड - I

शोध नवनीत
नामूलं लिख्यते किञ्चित्

# शोध नवनीत
# SHODH NAVNEET

(षाण्मासिकी अन्ताराष्ट्रिया शोध-पत्रिका)

The Half Yearly International Refereed Research Journal of Humanities and Oriental Knowledge

हमारा प्रयास समाजोपयोगी, नवीन एवं प्राच्यज्ञान का प्रकाशन

"Our whole effort is to publish societal, innovative and oriental knowledge"

Impact Factor : 3.082
Reg. No. 1137/2013-2014
UGC Approved SL. No. 40890

स्तुति प्राच्यविद्या समिति, गोण्डा (उ.प्र.)
STUTI PRACHYAVIDYA SAMITI, GONDA (U.P.)
अन्तर्जाल (Website) : www.shodhnavneet.com
अणुसंकेत (E-mail) : shodhnavneet@gmail.com
चलभाष (contact us) : +91-7800193920

Scanned with CamScanner

# विषयानुक्रमणिका

(CONTENTS)


- योगरहस्यस्य शास्त्रीयस्वरूपत्वम् 1
  *प्रो. सुकान्तकुमारसेनापतिः*
- योगस्थैः विविधैः आसनैः रोगनिवारणम् 7
  *डॉ. परमेशकुमारशर्मा*
- भारतीयभाषाभिः समं संस्कृतस्यअन्तः सम्बन्धः 18
  (मेघदूतस्य त्रयोदशभाषापद्यानुवादसन्दर्भे)
  *प्रो. सत्यप्रकाश दुबे*
- काश्मीरशिवाद्वयवादे सृष्टेरुन्मीलनस्य तार्किक-विश्लेषणम् 23
  *सौगतः घोषः, डॉ. सुरभिः वर्मा*
- उपनिषदानुसारेण आत्मन अवस्थानां परिशीलनम् 33
  *मनोतोष सरकार (Monotosh Sarkar)*
- अष्टाङ्गयोगे मुद्राणां समावेशनम् 43
  *मणिकान्ततिवारी*
- सम्प्रदानकारकविषये वैयाकरणमतसमीक्षा 49
  *अरिन्दममण्डलः (Arindam Mondal)*
- धातुशक्तिविमर्शः 56
  *सुश्रीविदुषीबोल्ला*
- शब्दानुशासने स्थानिवद्भावः 63
  *मधुसूदनदासः*
- वेदार्थज्ञाने यास्काचार्यस्य प्रतिभावैशिष्ट्यं निरुक्तस्य महत्त्वं च निरूपणम् 70
  *डॉ. सुदेवः*
- व्याकरणशास्त्रस्य महत्त्वम् 74
  *दीपक शर्मा*
- कतिपयवैयाकरणसिद्धान्तः - एका समीक्षा 77
  *पुरातन शर्मा*
- रामायणीय-वर्षावर्णने वैज्ञानिकता 81
  *धर्मेन्द्र दास*
- विष्णुपुराणे मोक्षस्य अवधारणा 88
  *तरणीकुमारपण्डा*




Scanned with CamScanner

Shodh Navneet (International Refereed Research Journal)
ISSN : 2321-6581, Impact Factor : 3.082, Vol. XII, Jan. - June - 2019

# धातुशक्तिविमर्शः

सुश्रीविदुषीबोल्ला*

तत्र तावद् दीक्षितादयः मण्डनमिश्रानुयायिनः धातोः फलमात्रमर्थः, व्यापारश्च प्रत्ययार्थः इति स्वीकुर्वन्ति। एवञ्च नैयायिकानां नये फलव्यापारौ धातोः अर्थौ स्तः। लडादिलकाराणाञ्च कृतिः नाम यत्नोर्थः मन्यन्ते, लघवात्। तथा च धातौ फलनिरूपिता शक्तिः पृथक्, व्यापारनिरूपिता शक्तिश्च पृथक् इति धातोः पृथक्शक्तिम् अर्थात् फलांशे एका शक्तिः, व्यापारांशे च एका शक्तिरिति शक्तिद्वयम्, ताभ्यां शक्तिभ्याञ्च फलस्य व्यापारस्य चाऽर्थस्य पृथगुपस्थितिरिति[१] प्राचीनशाब्दिकाः स्वीकुर्वन्ति। नागेशश्च पृथक् शक्तिं दोषप्रदर्शनपूर्वकं निरस्य विशिष्टेऽर्थे शक्तिमर्थात् फलावच्छिन्ने व्यापारेऽर्थात् फलविशिष्टव्यापारे, व्यापारावच्छिन्ने फलेऽर्थात् व्यापारविशिष्टफले च धातुशक्तिं स्वीकरोति। एवञ्च धातौ पृथक्शक्तिवादिनः दीक्षितादयः, विशिष्टशक्तिवादिनश्च नागेशभट्टाः इति बोध्यम्।

**( क ) मण्डनमिश्रमतम्, तत्खण्डनञ्च** – मण्डनमिश्रमते तु धातोः फलमात्रमर्थः, व्यापारश्च प्रत्ययार्थः इति स्वीकुर्वन्ति। मीमांसकमतखण्डनाऽवसरे नागेशेन चतुर्दश आपत्तयः प्रदर्शिताः –

**१. सूत्रविरोधापत्तिः** – 'लः कर्म्मणि च भावे चाऽकर्म्मकेभ्यः'[२] इत्यनेन सूत्रेण कर्त्तरि कर्म्मणि च लकाराः विधीयन्ते। तस्मात् कर्त्तृकर्म्मणोः एव प्रत्ययार्थता लभ्यते, व्यापारस्य प्रत्ययार्थत्वे तु सूत्रेणाऽनेन विरोधः स्यात्।

**२. अनेकप्रत्ययेषु शक्तिकल्पनमिति गौरवापत्तिः** – पचति, पक्ष्यति इत्यत्र तिङः, पक्ववान् इत्यत्र कृतः फूत्कारादि–व्यापारबोधायाऽनेकप्रत्ययानां शक्तिस्वीकारापेक्षया तिङन्तकृदन्तप्रयोगे वर्त्तमानस्यैकस्य धातोरेव शक्तिकल्पनायां लाघवं स्यात्।

**३. कारणान्तरकल्पनमिति गौरवापत्तिः** – 'पचति' इति प्रयोगे तिङा फूत्कारादिप्रतीतिः, तथा 'गच्छती'त्यादावपि तादृशस्यैव तिङः सत्त्वात् फूत्कारप्रतीत्यापत्तिः स्यात् । तद्वारणाय मीमांसकमते फूत्कारप्रतीतये पृथक्तया पचिसमभिव्याहारस्याऽपि कारणत्वं कल्प्यमिति कारणान्तरकल्पनया गौरवापत्तिः स्यात्। कार्य्यकारणभावस्वरूपन्तु – 'आख्यातार्थफूत्कारविषयकशाब्दबोधं प्रति पच्धातुसमभिव्याहृत-तिङ्पदजन्योपस्थितिः कारणमि'ति । एवमेव अनेकविधव्यापारविषयकशाब्दबोधं प्रति तत्तद्धातुसमभिव्याहारस्य कारणत्वकल्पने महद् गौरवं स्यात्।

**४. सकर्म्मकादिव्यवहारोच्छेदापत्तिः** – 'धात्वर्थव्यापारव्यधिकरणफलवाचकत्वं सकर्म्मकत्वम्'[३], 'धात्वर्थव्यापारसमानाधिकरणफलवाचकत्वमकर्म्मकत्वमि[४]'ति व्याकरणशास्त्रे सकर्म्मकाऽकर्म्मकव्यवहारः प्रत्ययार्थव्यापारत्वे नोपपद्येत। यदि 'प्रत्ययार्थव्यापारव्यधिकरणफलवाचकत्वं सकर्म्मकत्वम्'[५], 'प्रत्ययार्थव्यापारसमानाधिकरणफलवाचकत्वमकर्म्मकत्वमि[६]'ति स्वीकारे सकर्म्म-काऽकर्म्मकव्यवहारसम्भवः, अपि च, 'प्रत्ययार्थव्यापाराश्रयत्वं कर्त्तृत्वमि[६]'ति स्वीकारे 'घटं भावयति' इत्यत्र णिच्प्रत्ययार्थप्रेषणादिव्यापाराश्रयः देवदत्तः, न तु घटः अचेतनत्वात्, तर्हि घटस्य कर्त्तृत्वाभावात्

* शोधच्छात्रा, व्याकरणविभागः, राष्ट्रियसंस्कृतसंस्थानम्, क.जे. सोमैयासंस्कृतविद्यापीठम्, विद्याविहारः, मुम्बई (महाराष्ट्रम्)



Scanned with CamScanner

'गतिबुद्धि.'[८] इति सूत्रेण कर्त्तरि विधीयमानं कर्म्मत्वं न स्यादिति न दोषः। घटस्य णिच्प्रत्ययार्थप्रयोजकव्यापाराधिकरणदेवदत्तभिन्नघटरूपाधिकरणे विद्यमानोत्पत्तिरूपफलस्याऽऽश्रयत्वेन घटादेः 'कर्त्तुरीप्सिततमं कर्म्म'[९] इत्यनेन कर्म्मत्वं सुलभम्। परमेवं कर्म्मत्वे स्वीकृते पाचयति देवदत्तो यज्ञदत्तेन इत्यत्राऽपि यज्ञदत्तस्य कर्म्मत्वं स्यात्। तेन कर्त्तरि तृतीयाऽनापत्तिः।

**५. अभिधानादिव्यवस्थोच्छेदापत्तिः** – अस्मन्मते प्रत्ययार्थः कर्त्ता, कर्म्म स्वीक्रियते, तदा तिङा क्वचित् कर्तुः, क्वचित् कर्म्मणः अभिधाने सति उक्ते कर्त्तरि प्रथमा,[१०] अनुक्ते च तृतीया,[११] एवमेव उक्ते कर्म्मणि प्रथमा, अनुक्ते च द्वितीया इत्याद्यभिधानाऽभिधानव्यवस्थोत्पद्यते। परं मीमांसकनये व्यापारस्य प्रत्ययार्थत्वे तु तेन व्यापारस्यैवाऽभिधानात्, कर्तृकर्म्मणोरभावात्, प्रथमाद्वितीयादिविधानव्यवस्थायाः उच्छेदः स्यात्।

**६. यास्कवचोविरोधापत्तिः** – यदि चाऽत्र मीमांसका ब्रवीरन् – कर्तृप्रत्यये व्यापारेण स्वोपपादकस्य आश्रयस्याऽऽक्षेपात् कर्त्तुरभिधानम्, कर्म्मप्रत्यये च प्रधानेन फलेन स्वाश्रयाक्षेपात् कर्म्मणोऽभिधानमिति न अभिधानव्यवस्थोच्छेदापत्तिरिति, तर्हि अपरो दोषः प्रवर्त्तते। तथाह्याक्षिप्तायाः व्यक्तेः शाब्दबोधे प्राधान्यं स्वीक्रियते यथा जातिशक्तिवादे, तथैव प्रत्ययार्थव्यापाराक्षिप्तस्य कर्त्तुः फलाक्षिप्तकर्म्मणश्च प्राधान्यं शाब्दबोधेऽऽपद्येत, ततश्च 'क्रियाप्रधानमाख्यातम्' इति यास्कवचनाद् विरोधापत्तिः स्यात्।

**७. सूत्रवैयर्थ्यापत्तिः** – अपि च, धातुना फलस्य बोधात्, फलाश्रयस्य कर्म्मणश्चाऽऽक्षेपेणैव बोधात्, कर्म्मणो बोधस्य 'लः कर्म्मणि'[१२] इत्यनेन कर्म्मणि लकारविधानवैय्यर्थं स्यात्, कर्म्मबोधस्याऽन्यथासिद्धत्वात्।

**८. कारकभावनोभयवाचकत्वमिति गौरवापत्तिः** – धातोः व्यापारार्थाभावे पक्वः, पाचकः इत्यादौ कर्म्मकर्तृकारकस्य व्यापारस्य च प्रतीतये कर्म्मार्थककृतां कर्त्रर्थककृताञ्च कारकभावनोभयवाचकत्वं मीमांसकेनाऽङ्गीकरणीयम्, येन गौरवापत्तिः स्यात्।

**९. 'ग्रामो गमनवानि'त्यापत्तिः** – यदि 'पक्वः, पाचकः' इत्यादौ व्यापारस्याऽऽक्षेपाद् बोध इति मीमांसकैः उच्येत येनोभयवाचकत्वरूपगौरवं न स्यादिति, तर्हि भावे विहितानां घञादिप्रत्ययानां व्यापारावाचकत्वे धात्वर्थफलमात्रवाचकत्वे च भावल्युडन्तस्य 'गमन' पदस्य धात्वर्थसंयोगमात्रवाचकत्वात् ग्रामस्य च संयोगवत्त्वात् 'ग्रामो गमनवान्' इति प्रयोगापत्तिः स्यात्।

**१०. कर्त्तुरभिधानापत्तिः** - यदि च भावविहितस्य ल्युड्घञादेः व्यापारवाचकत्वं स्वीक्रियते, तदा 'पचति देवदत्त' इत्यादौ तिङ्वाच्यव्यापारेण स्वाश्रयस्य कर्त्तुराक्षेपादभिधानवत् 'देवदत्तस्य गमनम्' इत्यादावपि भावविहितल्युडादिवाच्यव्यापारेण स्वाश्रयस्य कर्त्तुराक्षेपात् सति कर्त्तुरभिधाने देवदत्तस्येत्यत्र प्रथमापत्तिः स्यात्।

**११. 'शिष्याभ्यामि'ति द्विवचनापत्तिः** – 'गुरुः शिष्याभ्यां पाचयती'त्यत्र 'हेतुमति च'[१३] इति सूत्रानुरोधेन णिजर्थः प्रयोजकव्यापारः, तिङर्थस्तु शेषः प्रयोज्यव्यापारो मीमांसकेन स्वीकर्त्तव्यः। एवञ्चोक्तवाक्ये तिप्प्रत्ययार्थस्यैकत्वसङ्ख्यायाः स्ववाचकाख्यातार्थव्यापारेऽन्वयिन्येवाऽन्वयात् अर्थात् एकत्ववाचकतिप्प्रत्ययार्थप्रयोज्यव्यापारे अन्वयिनि प्रयोज्यकर्त्तरि एवाऽन्वयात् 'शिष्याभ्यामि'त्यत्र द्विवचनस्याऽनापत्तिः स्यात् ।

**१२. 'पाचयत्ये'कवचनानापत्तिः** – 'देवदत्तः पचती'त्यादौ आख्यातकर्तृपदयोः समानवचनकत्वदर्शनात्, प्रकृते तु कर्तुः शिष्यस्य द्वित्ववत्त्वात् 'पाचयति' इत्यत्रैकवचनानापत्तिः स्यात्।

Scanned with CamScanner

**१३. 'गुरुः' इति प्रथमानापत्तिः** – तिङा प्रयोज्यव्यापारकर्त्तुः सङ्ख्यायाः अभिधानेन प्रयोजककर्त्तुः गुरोः सङ्ख्यायाः अनभिधानेन च 'गुरुः' इत्यत्र प्रथमायाः अनापत्तिः स्यात्। अनुक्ते च कर्त्तरि 'कर्त्तृकरणयोस्तृतीया'[१४] इति सूत्रेण तृतीया विधीयते।

**१४. 'शिष्यः' इति प्रथमापत्तिः** – शिष्यशब्दाच्च तिङा प्रयोज्यकर्त्तृगतसङ्ख्यायाः अभिधानेन उक्ते कर्त्तरि प्रथमापत्तिः स्यात्।

**( ख ) तार्किकमतम्, तत्खण्डनञ्च** – नव्यनैयायिकानां नये फलव्यापारौ धातोः अर्थौ स्तः। लडादिलकाराणाञ्च कृतिः नाम यत्नोर्थः मन्यते, लघवात् । अत्रायं भावः – कृतौ लकारस्य शक्तिस्वीकारे तु शक्यः कृतिः, शक्यता कृतौ, शक्यतावच्छेदकं कृतित्वम्, तच्च नाना कृतिषु अनुगतं जातिरूपमेकम्। एवञ्चैकशक्यतावच्छेदकदृष्ट्या लाघवम्। न तु कर्त्तरि शक्तिः स्वीकर्त्तव्या। कृत्याश्रयस्यैव कर्तृत्वकारणेनाऽत्र शक्तिस्वीकारे शक्यतावच्छेदकदृष्ट्या गौरवं स्यात्। अयमाशयः – 'प्रकृत्यर्थे प्रकारो भावप्रत्ययार्थः' इति नियमात् अत्र भावप्रत्ययस्य त्व इत्यस्य प्रकृतिः कर्त्ता, प्रकृत्यर्थः कृत्याश्रयः, तत्र प्रकारो नाम विशेषणं कृतिर्भवति। तथाहि इयं शक्यतावच्छेदिका कृतिः प्रतिकर्तृ भिन्नत्वात्, कर्तुः आनन्त्यात् गौरवं स्यात्। अतः कृतौ एव लकाराणां शक्तिः न्याय्या। अपि च, 'देवदत्तः पचती'त्यादौ प्रथमान्तेन देवदत्तादिपदेन कर्त्रर्थस्य बोधनात्, 'अनन्यलभ्यो हि शब्दार्थः' इत्यभियुक्त्युक्त्या च कृतेरेव शक्यता इति लभ्यते।

शाब्दबोधे आख्यातार्थे कृतौ धात्वर्थोऽनुकूलत्वसंसर्गेण विशेषणतयाऽन्वेति । यतो हि 'प्रकृत्यर्थप्रत्ययार्थयोः सहार्थत्वे प्रत्ययार्थस्यैव प्राधान्यमि'[१५]ति न्याय्यात्। न्यायस्यास्यार्थस्तु प्रकृत्यर्थस्य प्रत्ययार्थस्य च विशेषणविशेष्यभावेनाऽन्वयबोधे प्रत्ययार्थस्यैव विशेष्यत्वं भवतीति। प्रकृते प्रत्ययार्थः कृतिरेव विशेष्यः, प्रकृत्यर्थस्तु विशेषणम्। एवं प्रथमान्तार्थे आख्यातार्थो विशेषणं भवति, एतैः प्रथमान्तार्थमुख्यविशेष्यकः शाब्दबोधोऽङ्गीक्रियते। तथा च चैत्र पचतीत्यत्र शाब्दबोधस्तु – 'विक्लित्त्यनुकूलव्यापारानुकूलकृतिमांश्चैत्र' इति। 'रथो गच्छती'त्यादौ तु कर्त्तुरचेतनत्वात्, तत्र यत्नस्य चेतनमात्रधर्म्मस्य असम्भवात्, आख्यातस्य व्यापारे अथवा आश्रयत्वे चार्थे लक्षणा इति ब्रुवन्ति तार्किकाः। अत्र व्यापारे लक्षणायाम् – 'गमनानुकूलव्यापारवान् रथः', आश्रये तु – 'गमनाश्रयः रथः' इति च बोधः।

**( ग ) प्रथमान्तार्थमुख्यत्वनिराकरणम्** – आख्यातार्थे धात्वर्थो विशेषणम्, प्रकृत्यर्थप्रत्ययार्थयोः सहार्थत्वे प्रत्ययार्थस्यैव प्राधान्यात्। प्रथमान्तार्थे आख्यातार्थो विशेषणमिति तार्किकमतानुसारं 'पश्य मृगो धावती'ति वाक्यात् अन्यदेशसंयोगानुकूलधावनानुकूलकृतिमन्मृगकर्म्मकं प्रेरणाविषयीभूतं यद्दर्शनं तदनुकूलकृतिमांस्त्वमिति शाब्दबोधो जायते। शाब्दिकमते धात्वर्थव्यापारमुख्यविशेष्यकशाब्दबोधस्वीकारे मृगकर्त्तृकधावनकर्म्मकं प्रेरणाविषयीभूतं त्वत्कर्त्तृकं दर्शनमिति शाब्दबोधो भवति।

**तार्किकमते आपत्तिः**

**१. मृगन्धावत्यापत्तिः** – तार्किकरीत्या बोधे 'मृगो धावती'त्यत्र विशेष्यार्थवाचकमृगशब्दः प्रातिपदिकमस्ति, दृशिक्रियायाः कर्म्माप्यस्ति, अतः कर्म्मणि द्वितीयेत्यनेन मृगशब्दे द्वितीयाऽऽपत्तिः स्यात्। तथाहि यथा 'धावन्तं मृगं पश्य' इति द्वितीयान्तप्रयोगो भवति, तथैव पश्य मृगं धावतीत्यस्याऽऽपत्तिः स्यात्, 'पश्य मृगो धावती'ति प्रथमान्तप्रयोगश्च न स्यात्।

**२. प्रयोगविलयापत्तिः** – अप्रथमासमानाधिकरणेन शतृप्रत्यये सति 'धावन्तं मृगं पश्य' इति प्रयोगः एव स्यात्। अप्रथमासमानाधिकरणे अर्थात् अप्रथमेत्यनेन द्वितीयान्तादिः गृह्यते। समानाधिकरणत्वञ्चात्र तद्वाच्यवाचकत्वरूपम्। 'पश्य मृगं धावती'त्यत्र तत्पदेन द्वितीयान्तं मृगमिति पदम्, तस्य वाच्यो मृगः,

Scanned with CamScanner

तद्वाचकत्वं लटः, यतो हि धावतीत्यत्र कर्त्रर्थे लट्, तस्माल्लडर्थः कर्त्ता। धावतीत्यस्य कर्त्ता अत्र मृग एव। एवञ्च द्वितीयान्तेन, लटा चैत्रस्य मृगस्यैव बोधात् द्वितीयान्तार्थसमानमृगरूपार्थवाचके लटि लटः शतृशानचावप्रथमासमानाधिकरणे इति शतृप्रत्ययापत्तिः स्यात्। शतृशानजोः नित्यादेशे 'पश्य मृगो धावती'त्यादिः तिङन्तद्वयघटितप्रयोगो विलीनः स्यात्।

३. तत्र तार्किकद्वारा प्रदत्तं समाधानम् - अत्र तार्किको मृगशब्दे द्वितीयापत्तिं वारयन्नाह - संसर्गमर्य्यादया विशिष्टार्थवाचकस्य अन्यदेशसंयोगानुकूलधावनानुकूलकृतिविशिष्टमृगरूपार्थस्य बोधकस्य धावति मृग इति वाक्यस्यैव कर्म्मत्वम्, न तु पृथक्तया मृग इत्यस्य, अतो मृगे कर्म्मत्वाभावान्न द्वितीयाऽऽपत्तिः स्यात्।

४. शाब्दिकद्वारा तत्खण्डनम् - 'अनभिहिते' इत्यधिकारसूत्रप्रकरणे कारकाभिधानं तिङ्कृत्तद्धितसमासैः इति परिगण्णय परिगणस्य यथा भाष्ये प्रत्याख्यानं कृतम्, तेन परिगणनेन तत्प्रत्याख्यानप्रतिपादकभाष्यरीत्या च मृगपदे द्वितीयापत्तिः स्यादेव।

**(i) अनभिहिते इति सूत्रे परिगणनभाष्यम्** - 'अनभिहिते'[१६] इत्यधिकारसूत्रभाष्ये कृतं परिगणनप्रकारस्तु- कंटं भीष्मं कुरु इत्यादौ वाक्ये विशेष्यः कटः, विशेषणञ्च भीष्म इति, तत्र कर्त्तुरीप्सिततमं कर्म्म इत्यनेन विशेष्यस्य कटस्य कर्म्मत्वम्, कर्म्मणि द्वितीया इत्यनेन चाऽनुक्तकर्म्मणि कटे द्वितीया। तया द्वितीयया कर्म्मत्वस्योक्तत्वात् उक्तकर्म्मणि विशेषणे भीष्मशब्दे द्वितीया न स्यात्। अतोऽत्र सुपा कर्म्मत्वे उक्तेऽपि भीष्मशब्दे द्वितीयासाधनाय भाष्ये केन केन कारकस्योक्तत्वं मन्तव्यं तदर्थं परिगणनं कृतम्। तथा चाऽत्र परिगणितेषु तिङ्कृत्तद्धितसमासेषु केनाऽप्युक्तत्वाभावेन सुपा उक्तत्वस्याऽकिञ्चित्करत्वे भीष्मशब्देऽप्यनुक्तकर्म्मत्वे सिद्धे द्वितीया भवेदेव इति परिगणनाभिप्रायो भाष्यकृतः।

**(ii) अनभिहिते इति सूत्रे परिगणनस्य प्रत्याख्यानभाष्यम्** - 'कटं भीष्मं कुरु' इत्यत्र भीष्मशब्दे द्वितीयाविभक्तिसम्पादनाय परिगण्णय, तदनन्तरं परिगणनं विनापि भीष्मे द्वितीया सम्भवेति परिगणनस्य प्रत्याख्यानं भाष्यकृता कृतम्। तत्कुतः? अत्रोच्यते - सर्वेषां कारकाणां साक्षात्, स्वाश्रयद्वारा वाऽरुणाधिकरणन्याय्येन क्रियायामन्वयो भवतीति। एवं प्रकृतेऽपि भीष्मस्य पूर्वं करणक्रियायामन्वयः, क्रियान्वयित्वात् तस्य कर्म्मत्वं सुलभम्, पश्चाच्च कटशब्देन सह विशेष्यविशेषणभावेनाऽन्वयः। यदि पूर्वं कटेन भीष्मस्याऽन्वयो भवेत्, तदैव कटशब्दोत्पन्नद्वितीयया कर्म्मत्वोक्तिप्रसङ्गः। अत्र तु क्रियान्वयकाले कर्म्मत्वप्राप्तिसमये स एकाकी एव, अतो नान्ययाऽसम्बद्धया कटनिष्ठद्वितीयया भीष्मनिष्ठकर्म्मत्वस्योक्तिः, तया द्वितीयया कटनिष्ठकर्म्मत्वस्याव केवलमुक्तत्वमिति भावः। तदेवं समेषां कारकाणां विशेष्यात् पूर्वं क्रियान्वयस्वीकारात् भीष्मशब्देऽपि विशेष्यवत् करणक्रियान्वयित्वात् कर्म्मकारकत्वं सम्भवम्, अतो न परिगणनापेक्षा । तथा च विशेष्यं विशेषणं वा भवतु, तयोः पूर्वं क्रियायामेवान्वयः, पश्चात् वाक्यार्थबोधकाले तयोः विशेष्यविशेषणभावेन भीष्मकटयोः परस्परमन्वयः एव पार्ष्णिकः अर्थात् पश्चाज्जायमानोऽन्वयः उच्यते ।

**(iii) मीमांसकाभिमतिः** - उपर्य्युक्तपार्ष्णिकान्वय एव मीमांसकैः अरुणाधिकरणे ज्योतिष्टोमप्रकरणे स्वीकृतः। अत्र अरुणया पिङ्गाक्ष्या एकहायन्या सोमं क्रीणाति इत्यत्र अरुणया इति करणकारकस्य क्रीणाति इति क्रियायामन्वयसम्पाद्यते, तदनन्तरमेव विशेष्यविशेषणयोः पिङ्गाक्ष्यरुणयोः अन्वयः मीमांसकैः स्वीक्रियते। तस्माद् 'धावति मृग' इत्यत्र विशिष्टस्य कर्म्मत्वेऽपि धावनरूपविशेषणस्य, मृगरूपविशेष्यस्य च कर्म्मत्वम्। तत्र धावनार्थवाचकस्य धावतीत्यस्य प्रातिपदिकत्वाभावात्, मृगे विशेषणत्वेन साकाङ्क्षत्वात् अन्यत्र दृशिक्रियायां निराङ्क्षत्वाच्च दृशिक्रियासम्बन्धाभावात् क्रियान्वयित्वरूपकर्म्मत्वाभान्न

Scanned with CamScanner

द्वितीयोत्पत्तिः। किन्तु मृगशब्दात् द्वितीयापत्तिस्तु भवेदेव।

**५. शाब्दिकसिद्धान्ते दोषाभावः** – अस्मन्मते धात्वर्थव्यापारमुख्यविशेष्यशाब्दबोधः, तदनुसारं पश्य मृगो धावतीति वाक्यात् मृगकर्त्तृकधावनकर्म्मकं प्रेरणाविषयीभूतं त्वत्कर्त्तृकं दर्शनमिति बोधो जायते। अत्र विशेष्यद्वयम् – धावनम्, दर्शनञ्च। किन्तु धावनमित्यस्य दर्शने विशेषणत्वात्, मृगकर्त्रपेक्षयाऽस्य विशेष्यत्वेऽपि न मुख्यविशेष्यत्वम्। यत् कस्याऽपि विशेषणं न भवति किन्तु विशेष्यमेव तदेव मुख्यविशेष्यमुच्यते। शाब्दबोधाऽऽकारस्य विवरणम् – धावतीत्यत्र तिबर्थकर्त्तरि मृगस्याऽभेदेन, कर्त्तुश्च स्ववृत्तित्वसम्बन्धेन धावने, दृशिक्रियायां धावनस्य कर्म्मत्वात् स्वकर्म्मकत्वसम्बन्धेन धावनस्य दर्शने, लोडर्थप्रवर्त्तनारूपप्रेरणायाश्च विषयत्वसम्बन्धेन दर्शने, पश्येत्यत्र सिबर्थकर्त्तरि आक्षिप्तयुष्मदः अभेदेन, तत्कर्त्तुश्च स्ववृत्तित्वसम्बन्धेन दर्शने अन्वयः। इह मृगो धावतीत्यस्य सत्यपि कर्म्मत्वे, विशेष्यभूतस्य धावनरूपार्थस्य वाचकस्य धाव इत्यस्य धातुत्वेन अर्थवदिति सूत्रेण प्रातिपदिकत्वाभावान्न स्वाद्युत्पत्तिः, अतो न द्वितीया। द्वितीयाभावेऽपि पदसमभिव्याहाररूपायाः आकाङ्क्षारेयाः ज्ञानेन कर्म्मत्वं भासते।

**( क ) भाष्यप्रामाण्यम्** – तिङन्तद्वयघटितवाक्येषु एकस्य मुख्यत्वमित्यत्र भूवादयो धातवः इत्यत्र पचिप्रभृतयः क्रियाः भवतिक्रियायाः कर्त्र्यो भवन्तीति भाष्यमेव प्रमाणम्। अत्र तिङन्तद्वयघटितवाक्ये पचति भवति इत्यत्र भवति इत्यस्य पचति इति कर्त्तृरूपं विशेषणम्, प्रधानन्तु भवतिक्रियैव। एवञ्च 'पचति, भवति' इत्यतः एककर्तृकपाकक्रियाकर्तृका सत्ता इति बोधो भवति।

**( ख ) कारिकाप्रामाण्यम्** – सुबन्तं हि यथाऽनेकतिङन्तस्य विशेषणम्।
तथा तिङन्तमप्याहुस्तिङन्तस्य विशेषणम्।। इति।।

भर्त्तृहरिणाऽप्युक्तम् – चैत्रः, तण्डुलम् इत्यादि अनेकं सुबन्तं यथा एकस्य पचति इत्यादेः तिङन्तस्य विशेषणं भवति, तथैव अनेकं तिङन्तमपि एकस्य तिङन्तस्य विशेषणं भवतीति।

**( ग ) दीक्षितमतम्, तत्खण्डनञ्च** – फलव्यापारयोर्धातुरित्यत्र द्विवचनप्रयोगेण धातोः फलनिरूपिता, व्यापारनिरूपिता च पृथक् पृथक् द्वे शक्ती, वृन्तगतफलद्वयन्याय्येन वा एका शक्तिरिति प्राचीनवैयाकरणैर्मन्येते। अत्र धातोः खण्डशः शक्तिद्वयमिति मते उद्देश्यविधेयभावेनाऽन्वयः, व्युत्पत्तिद्वयकल्पनम्, शक्तिद्वयकल्पनम्, विशिष्टार्थबोधजनकत्वसम्बन्धद्वयकल्पनमिति चत्वारो दोषाः आपद्यन्ते –

**( अ ) उद्देश्यविधेयभावेनाऽन्वयः** – फले व्यापारे च यदि धातोः पृथक् शक्तिरिति मते उद्देश्यविधेयभावेनाऽन्वयापत्तिरापद्यते। 'पृथगुपस्थितपदार्थयोः परस्परमुद्देश्यविधेयभावेनान्वयः' इति व्युत्पत्त्या 'नीलो घटः' इति स्थले उद्देश्यविधेयभावेनाऽन्वये घटोद्देश्यकनीलविधेयको बोधो भवति, तथैव फलव्यापारयोरपि व्यापारोद्देश्यकफलविधेयकस्य, फलोद्देश्यकव्यापारविधेयकस्य च बोधस्यापत्तिः स्यात्। वस्तुतस्तत्र जन्यजनकभावसंसर्गेणाऽन्वयः इष्टः, स न स्यादिति तदाशयः।

**( ब ) व्युत्पत्तिद्वयकल्पनम्** – पृथक् शक्तौ एकधातुपदे व्युत्पत्तिद्वयस्य अर्थात् कार्य्यकारणभावद्वयस्य कल्पनाया आवश्यकत्वे गौरवातिशयमपि स्यात्। एका व्युत्पत्तिः 'पचति' इत्यादिकर्त्तृवाच्यप्रयोगकृतेफलविशेषणव्यापारबोधम्प्रति कर्त्तृप्रत्ययसमभिव्याहृतधातुजन्योपस्थिति कारणमित्येकं ज्ञानम्, एका च व्युत्पत्तिः 'पच्यते' इत्यादिकर्म्मवाच्यप्रयोगकृते व्यापारविशेषणफलबोधम्प्रति कर्म्मप्रत्यत्यसमभिव्याहृतधातुजन्योपस्थितिः कारणमिति द्वितीयं ज्ञानम्। व्युत्पत्तिद्वयस्वीकारादेव नव्यशाब्दिकमते पचति, पच्यते इत्यत्र भिन्नः भिन्नः व्यापारविशेष्यकः फलविशेष्यकश्च बोधः उपपद्यते।

**( स ) शक्तिद्वयकल्पनम्** – अत्र एकस्य धातोरर्थद्वये = फले, व्यापारे च शक्तिद्वयस्य कल्पना

Scanned with CamScanner

आवश्यकी भवति। शक्तिद्वयन्तु फलनिरूपितशक्तिः, व्यापारनिरूपितशक्तिश्चेति।

**(द) सम्बन्धद्वयकल्पनम्** – धातोः अर्थबोधाय बोधजनकत्वमावश्यकम्। अतः धातोः बोधविषयेऽर्थे सम्बन्धः स्वीकार्य्यः। अत्र बोधविषयोऽर्थोऽस्ति – फलविशिष्टव्यापारः, व्यापारविशिष्टफलञ्च। एवं हि तिबादिकर्तृप्रत्ययविशिष्टधातोः फलविशिष्टव्यापारे, तादिकर्म्मप्रत्ययसमभिव्याहारविशिष्टधातोः व्यापारविशिष्टफले सम्बन्धः मान्यः स्यात्, विशिष्टार्थद्वयस्य सम्बन्धद्वयकल्पनमर्थात् फलविशिष्टव्यापारबोधजनकत्वव्यापारविशिष्टफलबोधजनकत्वरूपं विना धातोः शक्त्यभावे विशिष्टबोधासम्भवात्। स्वीकृते च सम्बन्धद्वये विशिष्टस्याऽर्थात् सम्बन्धिनः बोधः दीक्षिताभिमतबोधजनकत्वशक्त्या सम्भवः। अनया रीत्याऽत्र मते सम्बन्धद्वयकल्पनायाः अतिरिक्तं गौरवमापतति।

**(ङ) नागेशमतम्** – नागेशमते फलावच्छिन्ने व्यापारे अर्थात् कर्तृभावप्रत्ययस्थले अनुकूलत्वसम्बन्धेन फलविशिष्टे व्यापारे, व्यापारावच्छिन्ने फले अर्थात् कर्म्मप्रत्ययस्थले जन्यत्वसम्बन्धेन व्यापारविशिष्टे फले च पचादिधातूनां 'विशिष्टा शक्तिः' भवति। विशिष्टशक्तिस्वीकारे सर्वत्र कर्तृभावकर्म्मप्रत्ययस्थले द्विविधविशेष्यकबोधापत्तिः स्यात्। अत एवाऽत्र नियामकः आवश्यकः, नियामकस्तु – फलविशेषणकव्यापारविशेष्यकशाब्दबोधम्प्रति कर्तृभावप्रत्ययसमभिव्याहारो नियामकः, अपि च व्यापारविशेषणकफलविशेष्यकशाब्दबोधम्प्रति कर्म्मप्रत्ययसमभिव्याहारो नियामको भवति। एवञ्चैकत्रैकस्यैव नियामकसत्त्वे एकविशेष्यक एव बोधः।

**(च) परिशीलनम्** – खण्डशः शक्तिवादे, विशिष्टशक्तिवादे च कश्चन विशेषो वर्त्तते –

**(क)** विशिष्टशक्तिवादे अनुकूलत्वस्य जन्यत्वस्य च संसर्गस्य विशिष्टशः अर्थे सत्त्वेन शक्तिभास्यत्वमर्थात् धातुपदार्थः सम्बन्धो भवति। पृथक्शक्तिवादे खण्डशः शक्तिवादे च फले व्यापारे एव च स्वतन्त्रतया शक्तिस्वीकारादनुकूलत्वसम्बन्धस्य शक्त्याऽभास्यत्वे पचतीत्यादिसमभिव्याहारेणा ऽऽकाङ्क्षया वाक्येन प्रतीयमानो वाक्यार्थ इति विशेषः।

**(ख)** विशिष्टवाचकत्वं मन्यमानानां नव्यानां मते नोद्देश्यविधेयभावेनान्वयापत्तिः, तादृशान्वयप्रयोजिकायाः पृथगुपस्थितेरसत्त्वात्। किञ्च जन्यजनकभावस्य शक्त्या ज्ञातत्वेन फलविशिष्टव्यापारमुद्दिश्य व्यापारविशिष्टफलविधानासम्भवात्।

**(ग)** पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेन इति व्युत्पत्तेरनित्यत्वस्वीकारात् कर्म्मणः धात्वर्थैकदेशे फले, कर्तुश्च धात्वर्थैकदेशे व्यापारेऽन्वयो भवति।

## सन्दर्भाः


१. फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः।
फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम्।। इति।। वै. भू. सा. का. १

२. पाणिनीय-अष्टध्यायी, ३.४.६९, पृ. सं. २८, मन्त्रीरामलालकपूरट्रस्ट, सोनीपत, २००५

३. परमलघुमञ्जूषा, पृ. सं. – ४१२, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, २०१८

४. परमलघुमञ्जूषा, पृ. सं. – ४१२, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, २०१८

५. परमलघुमञ्जूषा, पृ. सं. – ३९१, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, २०१८

६. परमलघुमञ्जूषा, पृ. सं. – ३९२, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, २०१८

७. परमलघुमञ्जूषा, पृ. सं. – ३९२, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, २०१८

८. पाणिनीय-अष्टाध्यायी, १.४.५२, पृ. सं. ७, मन्त्रीरामलालकपूरट्रस्ट, सोनीपत, २००५


Scanned with CamScanner

९. पाणिनीय-अष्टाध्यायी, १.४.४९, पृ. सं. ७, मन्त्रीरामलालकपूरट्रस्ट, सोनीपत, २००५
१०. अभिहिते प्रथमाति वार्त्तिकेन प्रथमा विधीयते।
११. कर्तृकरणयोस्तृतीया इत्यनेन अनुक्ते कर्त्तरि तृतीया विधीयते, पा. अष्टा. २.३.१८
१२. पा. अष्टा. ३.४.६९, पृ. सं. २८, मन्त्रीरामलालकपूरट्रस्ट, सोनीपत, सप्तदशसंस्करणम्, २००५
१३. पा. अष्टा. ३.१.२६, पृ. सं. १६, मन्त्रीरामलालकपूरट्रस्ट, सोनीपत, सप्तदशसंस्करणम्, २००५
१४. पा. अष्टा. २.३.१८, पृ. सं. १२, मन्त्रीरामलालकपूरट्रस्ट, सोनीपत, सप्तदशसंस्करणम्, २००५
१५. परमलघुमञ्जूषा, पृ. सं. - ४३०, हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम्, २०१८
१६. पा. अष्टा. २.३.१, पृ. सं. ११, मन्त्रीरामलालकपूरट्रस्ट, सोनीपत, सप्तदशसंस्करणम्, २००५

## सहायकग्रन्थसूची


- वाक्यपदीयम् (ब्रह्मकाण्डम्), सम्पादकः - सूर्यनारायणशुक्लः, रामगोविन्दशुक्लः, चौखम्भासंस्कृतसंस्थानम्, वाराणसी, प्रथमसंस्करणम्, २००६
- वाक्यपदीयम् (ब्रह्मकाण्डम्), सम्पादकः, व्याख्याकारश्च - आचार्य्यवेदान्तझाः, मन्दाकिनीसंस्कृतविद्वत्परिषद्, देहली, प्रथमसंस्करणम्, २००२
- व्याकरणमहाभाष्यम्, सम्पादकः - श्रीगुरुप्रसादशास्त्री, प्रतिभाप्रकाशनम्, देहली, प्रथमसंस्करणम्, १९३८
- पाणिनीयः अष्टाध्यायीसूत्रपाठः, सम्पा. श्री पं. ब्रह्मदत्तजिज्ञासु, राधाप्रेस, देहली, सप्तदशं संस्करणम्, २००५
- परमलघुमञ्जूषा, सम्पा. व्याख्याकारश्च - प्रो. बोधकुमारझाः, हंसाप्रकाशनम्, जयपुर, संस्करणम्, २०१८
- लघुशब्देन्दुशेखरः, सम्पा. प्रो. बालशास्त्री, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी, संस्करणम्, २०१३
- समासस्तदव्ययीभावश्च, प्रो. बोधकुमारझाः, विद्यानिधिप्रकाशनम्, देहली, प्रथमसंस्करणम्, २०११
- प्रौढनिबन्धसौरभम्, आचार्यविश्वनाथमिश्रः, राष्ट्रियसंस्कृतसाहित्यकेन्द्रम्, जयपुर, प्रथमसंस्करणम्, २००३
- तत्त्वबोधिनीसमाख्यव्याख्यासंवलितासिद्धान्तकौमुदी, चौखम्बासंस्कृतप्रतिष्ठानम्, देहली, संस्करणम्, २०१०
- वैयाकरणभूषणसारः प्रभादर्पणव्याख्याद्वयोपेतः, सम्पादकः - श्रीबालकृष्णपञ्चोली, चौखम्बासंस्कृतसंस्थानम्, विक्रमसंवत् २०६८, ई. २०१२
- परमलघुमञ्जूषा, भावप्रकाशिका, बालबोधिनी संस्कृतहिन्दीव्याख्योपेता, व्याख्योपेता, व्यख्याकारः सम्पादकश्च - डॉ. जयशङ्करलालत्रिपाठी, चौखम्बाकृष्णदास-अकादमी, वाराणसी, चतुर्थसंस्करणम्, २०११
- संस्कृतभाषाविज्ञानम्, अनुसन्धाता - चक्रवर्ती श्रीराधाधीनचतुर्वेदी, चौखम्बाविद्याभवनम्, वाराणसी, प्रथमसंस्करणम्, २००५


Scanned with CamScanner